CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नाट्य-कथा:

(संस्कृतायाः प्रसिद्धानां दश नाटकानां कथासाराः)
९-१० कक्षयोः कृते: सहायकग्रन्थः

यदा मूलशंकरः षोडशवर्षीजातः तदा स्वा...

घटनया मूलशंकरोऽतीव दुःखितोऽभवत् । यद्यपि तस्मिन् समये सर्वे बान्धवाः व्यलपन् तथापि अयं धैर्याधिक्यादश्रूणि नामुंचत् । अस्याः घटनाया अनन्तरं त्रिषु वर्षेषु समतिक्रान्तेषु पितृव्योऽप्यस्य परलोकमगच्छत् । अनया घटनया तु अस्य हृदयमेव व्यदीर्यत । परमस्मिन् अवसरेऽस्य विचारे महत् परिवर्तनं जातम् । सोऽचिन्तयत् यत् संसारोऽयमनित्यः । अनेके मनुष्याः प्रतिदिवसं मृत्युमुखं प्रविशन्ति । कथममरता भवेत् इति विचार्य एकस्मिन् दिवसे यथावसरं मूलशंकरः सर्वान् बान्धवान् श्रीसम्पन्नं भवनंच परित्यज्य गृहान्निष्क्रान्तः ।

ततोऽयम् देशाद्देशान्तरं गच्छन् न्यायवेदान्तादीनि शास्त्राणि अपठत् योगपद्धतिं चाशिक्षत । तथापि मूलशंकरः शान्तिं नाप्नोत् । ~~ततोऽयम् पुनः देशाद्देशान्तरं गच्छन् न्यायवेदान्तादीनि शास्त्राणि अपठत् योगपद्धतिं चाशिक्षत । तथापि मूलशंकरः शान्तिं नाप्नोत् ।~~ एवं भ्रमन्नयं नर्मदातीरमासाद्य स्वामि-पूर्णानन्दसरस्वतीसम्पर्कात् स्वयमपि संन्यासी अभवत् । तस्मिन्नेव समये दयानन्दसरस्वतीतिनाम्ना स प्रसिद्धो जातः ।

एवं पाण्डित्ये जातेऽपि स्वामिनो दयानन्दस्य ज्ञानलिप्सा शान्तिं नागात् । कदाचित् सः कैश्चित् प्रशस्यमानां दण्डिनो विरजानन्दस्वामिनोऽद्भुतां विद्वत्तामश्रृणोत् । तयाकृष्यमाणोऽयं मथुरानगरं गत्वा तस्मात् स्वामिनः त्रीणि वर्षाणि विविधानि शास्त्राणि पठितवान् । अध्ययनानन्तरं स्वामी दयानन्दोऽवदत्-गुरुवर्य ! अयमात्मा गुरुचरणेषु समर्पितः, आज्ञापयन्तु भवन्तः अनेन किं करणीयम्? श्रुत्वैतत् प्रसन्नो गुरुः तं प्रत्यवदत् पुत्र ! मम देशोऽधुना प्रायः अशिक्षितः ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रथमः पाठः

महर्षिर्दयानन्दः

गुर्जरप्रान्ते मोरवी-राज्यान्तर्गत टंकाराभिधाने ग्रामे: ~~ब्रह्म~~ महर्षिरयम् ।88। तमे वैक्रमे वर्षे एकमौदीच्यब्राम्हण कुलम् स्वजन्मनालङ्कृतवान् । पिता अस्य मूलशंकर इति नाम कृतवान् । प्रथमम् अयं कुलक्रमानुसरेणाध्ययनमकरोत् ।

यदा मूलशंकरः षोडशवर्षो जातः तदा एवास्यानुजा दिवंगता; अनया घटनया मूलशंकरोऽतीव दुःखितोऽभवत् । यद्यपि तस्मिन् समये सर्वे बान्धवाः व्यलपन् तथापि अयं धैर्याधिक्यादश्रूणि नामुंचत् । अस्याः घटनाया अनन्तरं त्रिषु वर्षेषु समतिक्रान्तेषु पितृव्योऽप्यस्य परलोकमगच्छत् । अनया घटनया तु अस्य हृदयमेव व्यदीर्यत । परमस्मिन् अवसरेऽस्य विचारे महत् परिवर्तनं जातम् । सोऽचिन्तयत् यत् संसारोऽयमनित्यः । अनेके मनुष्याः प्रतिदिवसं मृत्युमुखं प्रविशन्ति । कथममरता भवेत् इति विचार्य एकस्मिन् दिवसे यथावसरं मूलशंकरः सर्वान् बान्धवान् श्रीसम्पन्नं भवनंच परित्यज्य गृहान्निष्क्रान्तः ।

ततोऽयम् देशाद्देशान्तरं गच्छन् न्यायवेदान्तादीनि शास्त्राणि अपठत् योगपद्धतिं चाशिक्षत । तथापि मूलशंकरः शान्तिं नाप्नोत् । ~~ततोऽयम् पुनः देशाद्देशान्तरं गच्छन् न्यायवेदान्तादीनि शास्त्राणि अपठत् योगपद्धतिं चाशिक्षत । तथापि मूलशंकरः शान्तिं नाप्नोत्~~ । एवं भ्रमन्नयं नर्मदातीरमासाद्य स्वामि-पूर्णानन्दसरस्वतीसम्पर्कात् स्वयमपि संन्यासी अभवत् । तस्मिन्नेव समये दयानन्दसरस्वतीतिनाम्ना स प्रसिद्धो जातः ।

एवं पाण्डित्ये जातेऽपि स्वामिनो दयानन्दस्य ज्ञानलिप्सा शान्तिं नागात् । कदाचित् सः कैश्चित् प्रशस्यमानां दण्डिनो विरजानन्दस्वामिनोऽद्भुतां विद्वत्तामश्रृणोत् । तयाकृष्यमाणोऽयं मथुरानगरं गत्वा तस्मात् स्वामिनः त्रीणि वर्षाणि विविधानि शास्त्राणि पठितवान् । अध्ययनानन्तरं स्वामी दयानन्दोऽवदत्-गुरुवर्य ! अयमात्मा गुरुचरणेषु समर्पितः, आज्ञापयन्तु भवन्तः अनेन किं करणीयम्? श्रुत्वैतत् प्रसन्नो गुरुः तं प्रत्यवदत् पुत्र ! मम देशोऽधुना प्रायः अशिक्षितः ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गच्छ, शिक्षायाः प्रचारं प्रसारं च कुरु । अस्माकं शास्त्राण्युद्धर, वेदानां प्रचारं कृत्वा तद्धर्मं प्रसारय । जनान् सत्यस्य मार्गं दर्शय । अयमेवात्र मदीय आदेशः ।

गुरोराज्ञां शिरसि निधाय स्वामी दयानन्दः शिक्षायाः प्रचाराय उद्यतोऽभवत् । आजीवनं तेन देशस्य समाजस्य च कल्याणाय कार्यं कृतम् । यद्यपि तस्यमार्गं अनेकाः बाधा आगता तथापिस स्वनिश्चयान्न विरतः । बाधास्तु स्वयमेव नष्टाः ।

महर्षिरयं यादृशः विद्वद्वरेण्यः आसीद् तथैव दयालुरपि । अपकारिष्वपि तेन दया कृता । एकदा स्वोद्देश्यस्य प्रचारं कुर्वन्नयमनूपशहरं गतवान् । तत्रानेन स्वमतानां मण्डनं विरुद्धानां मतानां च खण्डनं कृतम् । अनेनैव कारणेन रुष्टेन केनाऽपि तस्मै सविषं ताम्बूलं दत्तम् । हठयोगस्य बलेनायं महात्मा विषप्रभावं दूरीकृतवान् परं सोऽपराधी केनचिद् राजपुरुषेण निगृह्य स्वामिनः पुरत आनीतः । महात्मा दयानन्दः तंदण्डयितुं नैच्छत् । स तं मोचयतिस्म ~~सतं स्म~~ । एवमेकदा स महर्षिः जोधपुरं गतः । तत्रत्यं नरेशमुपदिशन्नयं कस्याश्चिद् गणिकायाः कोपभाजनं जातः । तया प्रेरितः जगन्नाथनामा पाचकः दयानन्दाय दुग्धेन सह घोरं विषमददात् । क्षणानन्तरमेव महर्षिस्तद् रहस्यं ज्ञात्वा जगन्नाथमाहूयावदत् - त्वं मत् मार्गव्ययं गृहीत्वा शीघ्रमितः पलायस्व, अन्यथा दण्डभाग् भविष्यसि । हन्त ! धन्योऽयं महर्षिः येन स्वहन्तुरेव मार्गव्ययप्रदानेनान्यत्र संप्रेष्य प्राणरक्षा कृता। तेनैव विषप्रभावेण स मासद्वयं घोरं दुःखमनुभूय 1883, ख्रिस्ताब्दे दिवंगतः।

अयं महर्षिः राष्ट्रोद्धारकाणामग्रणीर्वीराग्रगण्यो निर्भीकः बालब्रह्मचारी आसीत् । अनेन वेदानां प्रचारः कृतः, अनेके ग्रन्थाश्च ~~हिन्दीभाषायां~~ लिखिताः । संस्कृतभाषायाश्च प्रचारोऽनेन विहितः ।

नारीणां दलितानामस्पृश्यानां च महानुद्धारः अनेन कृतः । भारतीयेषु देशानुरागाङ्कुरम् अनेनैव प्रथमं प्ररोहितम् । किं बहुना अयं महर्षिर्दयानन्दो वास्तविकस्य साम्यवादस्य जनयितासीत् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

।-श्रेणीकार्यम्

(अ) महर्षिदयानन्दस्य जन्म कदाभूत् ?

(आ) तस्य महाभागस्य जन्मस्थानं कथयत ।

(इ) अनेन देशहिताय किं कृतम् ?

(ई) महर्षि: कीदृश: विद्वान् आसीत् ?

========

द्वितीयः पाठः

पुष्पोद्भवं-कथा
===========

दण्डी
(दशकुमार चरितम्)

एतत् तु सुविदितमेव यत् दण्डी स्वीयाय पदलालित्याय जगत् प्रसिद्ध: । तस्य काले अलंकाराणां बाहुल्यमासीत् । जनानां रूचि: अलंकारेषु विशिष्टासीत् । दण्डिना दशकुमारचरितस्य रचना कृता । तत् एव इदं खण्डम् उद्धृतम् अस्ति । तस्य भाषा प्रवाह: विलोकनीय: ।

वामदेवस्य शिष्य: सोमदेवशर्मा नाम कंचित् एकं बालकं राज्ञ: पुरो निक्षिप्य अभाषत- "देव !, रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननस्य अवनौ वनितया कयापि धार्यमाणम् उज्जवलाकारं कुमारं विलोक्य सादरम् अभाष्यत - "स्थविरे, का त्वम् ? एतस्मिन् अटवीमध्ये बालकम् उद्वहन्ती किमर्थम् आयासेन भ्रमसि" ।

वृद्धयापि अभाषि - "मुनिवर, कालयवन-नाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवर: कश्चित् अस्ति । तस्य नंदिनी नयनानन्दकारिणीं सुवृत्तां नाम एतस्मात् द्वीपात् आगतो मगधनाथसंभवो रत्नोद्भवो नाम रमणीय-गुणालयो मनोहारी व्यवहारी उपयम्य सुवस्तुसंपदा श्वशुरेण संमानितो अभूत् । कालक्रमेण नताङ्गी गर्भिणी जाता ।

तत: सोदर-विलोकन-कौतूहलेन रत्नोद्भव: कथंचित् श्वशुरम् अनुनीय ---

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चपललोचनया पत्न्या सह पोतम् आरूह्य पुष्पपुरम् अभिप्रतस्थे । कल्लोलमालिकाभिहत: पोत: समुद्राम्भसि अमज्जद् ।

गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्याम् उद्वहन्ती फलकमेकम् अधिरुह्य दैवगत्या तीरभूमिम् अगमम् । सुहृज्जनपरिवृतो रत्नोद्भव: तत्र निमग्नो वा केनोपायेन तीरमगाद् वा न जानामि ।

क्लेशस्य परां काष्ठाम् अधिगता सुवृत्ता अस्मिन् अटवीमध्ये अद्य सुतम् असूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले शेते । विजने वने स्थातुम् अशक्यतया जनपदगामिनं मार्गम् अन्वेष्टुम् उद्युक्तया मया विवशाया: तस्या: समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽपि अनायि ।

तस्मिन्नेव क्षणे वन्यो वारण: कश्चिद् अदृश्यत । तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत । अहं समीप-लतागुल्मके प्रविश्य परीक्षमाणो अतिष्ठम् । निपतितं बालकं पल्लवकवलम् इव आददति गजपतौ एक: सिंह: महाग्रहेण न्यपतद् । भयाकुलेन दन्ताबलेन झटिति वियति समुत्पाद्यमानो बालको न्यपतद् । चिरायुष्मत्तया स च उन्नततरुशाखा-समासीनेन वानरेण केनचिद् पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्त: ।
सोऽपि मर्कट: क्वचित् अगात् ।

बालकेन सत्त्व-सम्पन्नतया सकल-क्लेश सहेनाभावि । केसरिणा करिणं निहत्य कुत्रचिद् अगामि । लतागृहीत् निर्गत: अहमपि तेज: पुंजं बालकं शनै: अवनीरुहात् अवतार्य वनान्तरे वनिताम् अन्विष्य अविलोक्य एनम् आनीय गुरवे निवेद्य तन्निदेशेन भवतो निकटम् आनीतवान् अस्मि इति । राजा विस्मितो रत्नोद्भवस्यपुत्रं तन्नाम्ना पुष्पोद्भवं विधाय तद्वृत्तान्तं व्याख्याय रत्नोद्भवस्य अग्रजाय सुश्रुताय समर्पितवान् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तृतीय: पाठ:

मनोरमा यात्रा

पर्यटनं सदा सुखदायकं न भवति तथापि जना: इतस्तत: पर्यटन्ति । इयं सामान्या धारणा लोकानां यत् पर्वतीयानि अंचलानि अतीव रमणीयानि भवन्ति अतो हि ते ग्रीष्मे पर्वतेभ्य: धावन्ति । ग्रीष्मे तेषां यात्रा सुखदा भवति किन्तु शीतकाले पर्वतानां यात्राया: कष्टानि अनुभूय एव ज्ञातुं शक्यन्ते न तु कल्पनया । पर्वतेष्वपि शिमला-नगरस्य यात्रा सविशेषं भयावहा यतो हि नगरमिदं शीतकाले पूर्णतया तुषाराच्छादितं भवति । तदानीन्तनस्य शीतस्य अनुमानं तद् अविलोक्य तथैव दुष्करं यथा युद्धभूमे: वर्णनम् । तथाहि पर्यटक: कदा कुत्र पर्वतखण्डेषु पतिष्यति, कुत्र स शैत्याभिहत: शयानो भविष्यति कुत्र हिमे निमंक्ष्यति एतत् न ज्ञातुं शक्यते। यद्यपि विज्ञानबलेन अनेकानि सुखसाधनानि जगति समायोजितानि तथापि प्रकृति: अद्यावधि अजेया तिष्ठति । सा इदानीमपि नैव पार्यते नियन्तुम् । अत्र प्रकृते: अनुपमाया: शोभाया: भाण्डारो विराजते । तत्र प्रकृति: उद्घोषयति नाहं मानवाधीना । न च कोऽपि मदीयां शोभाम् अतिशयितुं समर्थ: ।

शिमलानगरं लक्ष्मणपुरत: रेलमार्गै वर्तते किन्तु पर्वतेषु या गंत्री चलति सा क्रीडनकवत् भवति । पर्वतीय: मार्ग: वक्र:, वर्तुलाकारश्च भवति । अत: पर्वतमार्गेषु गन्त्री सर्पवत् सरति । यत्र कुत्रापि मार्गावरोध: आसीत् तत्र पर्वतान् विभिद्य शतश: सुरंगा: विनिर्मिता: । अत: गन्त्री तेषाम् अभ्यन्तरेषु प्रविशति । अभ्यन्तरे तिष्ठन् पर्यटक: बहि: द्रष्टुं न शक्नोति । दिनेऽपि रात्रि: समागता इति प्रतिभाति । यदा कदा स भयभीत: जायते । स चिन्तयति यत् यदि गंत्र्यां काचित् त्रुटि: जायेत यानस्य गति: अवरुद्धा जायेत अथवा शीघ्रं न बहि: आगच्छेत् तदा किं भविष्यति । तथापि येन केन प्रकारेण सुरंगायां गन्त्री सरलतया पर्वत-शिखरम् उपगच्छति । सुरंगा: केवलं तावत्य: विस्तृता: यावता केवलं गंन्त्री सरितुं पारयति । तत्र उभयत: न कोऽपि अन्य: स्थातुं शक्नोति ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

किन्तु यदा गन्त्री सुरंगायाः बहिः आगच्छति पर्यटकस्य सम्मुखं सुन्दरं चलं दृश्यं चित्रांकितम् इव भवति । सर्वत्र सर्वाणि वस्तूनि श्वेतवस्त्रा-वृतानि इव आभान्ति । अस्मिन् मार्गे धर्मपुरात् प्रागेव सरलवृक्षाणां वनानि समक्षम् आयान्ति। अत्रत्यानां पर्वतानां शोभा देवदारु-सरल पादपानां प्राधान्येन भवति । अत्रैव अस्ति एकं सोलन-नामकं नगरं यत्र अनेके पर्यटकाः सम्मिलन्ति । वस्तुतः इदमेकं व्यापारिकं केन्द्रम् । यदा गंत्री सोलनतः कुण्डा-घाटं प्रति चलति तदा अनेकानि विधुव-कंटकानि तारागणवत् दृश्यंते। प्रतीयते यत् सा नक्षत्राणि स्प्रष्टुं वांछति । यथा जनाः उच्चैः गमनाय शक्तिम् आदधति तथैव गंत्री अपि शक्तिं समादाय खुड़खुड़ कुर्वाणा उच्चैः धावति । मार्गे मेषपालकाः कृषकाः, भारंवहन्त्यो विविधा ललनाः दृष्टिपथे आयान्ति । अत्र पर्वताग्रेषु प्रवहन्त्यः वारिधाराः पर्यटकानां मनांसि मोहयन्ति । कीदृशं, स्वच्छं, शीतं, वेगपूर्णं जलं तत्र इति न शक्यते शब्दैः वक्तुम् । यदा गंत्री किंचित् दूरं चलति तदा अनेकानि लघूनि विशालानि च क्षेत्राणि परिलक्ष्यन्ते । तत्र इयन्ति दृश्यानि सम्मुखम् आयान्ति यान्ति च यत् तेषां राजिः न कदापि छिन्ना जायते ।

एकदाहं कार्यवशात् शिमलाननगरम् अगच्छम् । मयानुभूतं यद् आगते शिमलानगरे पर्यटकः सर्वाणि यात्रा-कष्टानि विस्मरति । अत्रत्यं घनीभूतं हरितत्वं तुषारस्य श्वेतत्वं, यात्रिणां मनांसि मोहयति । दूरात् शिमला पर्वतस्य क्रोडे स्वर्गमिव प्रतिभाति । अत्रत्याः आपणाः विविधाभिः सुखसाधन-सामग्रीभिः आपूरितानि । अत्रत्यः मालनामामार्गः अति विस्तीर्णः । "रिज" इत्याख्ये स्थले महार्घैः वस्त्रैः उपेताः यात्रिणः आयान्ति । ते आतपाय स्पृहयन्ति किन्तु कष्टं, यत् यः सूर्यः मरूभूमौ प्रचण्डतां धारयति स अत्र निष्प्रभः, पीतः निर्बलश्च प्रतीयते । अत्र प्रतिवर्षं प्रायः लक्षपरिमिताः पर्यटकाः आयान्ति । प्रकृति-क्रोडे ते सुखेन विहरन्ति ।

अत्र सुखयापणे यथा धनिकानां बाहुल्यं तथैव अस्य पार्श्वभूमौ निम्नाः,

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चतुर्थः पाठः

साबरमती आश्रमः

मासत्रयं यावद् भारतभुवि भ्रमित्वा तदानीन्तनं वृत्तान्तं साक्षात् कृत्य महात्मा-गान्धी अहमदाबाद नगरं प्रति न्यवर्तत । तत्र साबरमतीति नाम्न्याः तटिन्याः तीरे फिनिक्साश्रमानुकारिणं सत्याग्रहाश्रमं प्रतिष्ठापितवान् । आश्रमं प्रतिष्ठापयन् महात्मा तस्य प्रयोजनम् एवम् अवादीत्-यावद् वयं धार्मिका न भवामः तावद् किमपि कर्तुं नालं स्मः । धर्म्यं जीवनं च बाह्यैः कैश्चिद साधनैः नाप्यते । हृदये हि धर्मस्य वसतिः । यदि संसारे साफल्यम् इष्यते तर्हि धर्मः प्रचेतव्यः । अयमाश्रमो धर्मं प्रचेतुमुचितां सहायतां करिष्यति, ~~भूमा च सेवाधर्ममुप देक्ष्यतिच्च~~ ।

महात्मना अत्र कानिचित् व्रतानि विहितानि, तानि न केवलं प्रतिषेध स्वरूपाणि अपितु विधि प्रतिषेधोभयात्मकानि । इमानि नवसंख्यकानि सन्ति ।

1- सत्यव्रतम् - सामान्यतो असत्यस्य अनुच्चारेव न पर्याप्नोति । सत्यं परिशीलयता जनेन इदमपि अवधेयं यद् देशहिताय अपि कश्चिद न अतिसन्धेयः ।

2- अहिंसाव्रतम् - अहिंसाव्रत-पूर्तये प्राणिमात्रस्य अनुपघात एव न पर्याप्नोति । अन्यायवृत्तीनपि न हिंस्यात्, तेभ्यो मा क्रुध्येत् । अपि तु तेषु स्निह्येत् । मातापित्रोः राज्ञोऽन्यस्य वा कस्यचिद बलिनः अन्यायसमाचरणां प्रतिरोद्धुमुपायस्तु अवश्यमेव आस्थेयः । परम् न्यायधाधारो न मनागपि विप्रकार्यः । अन्यायाचारं प्रेम्णा जयेत् । यावदत्याचारो न विजीयते तावत् सर्वं सहेत ।

3- ब्रह्मचर्यव्रतम् - ऋते अस्मात् व्रतात् पूर्वयोः द्वयोः पालनम् असम्भवि । एतत् व्रतमनुपालयता अनृतया दृष्ट्या परकलत्रं नेक्षणीयमित्येव न पर्याप्नोति । इन्द्रियविक्रियां तथा नियच्छेद् यथा संकल्पेऽपि न सा संभवेत् । पाणिगृहीत्यामपि कामवृत्तिं विहाय मित्रम् इव वर्तेत ।

4- रसनेन्द्रियवशीकारव्रतम् - अनियम्य रसनां सद्वृत्तान्तरापि परिग्रहो दुर्लभः । एतत् व्रतमनुपालयता दृढमवधारणीयं यत् शरीरस्थितिरेव भोजनेनार्थं इति । शुद्धमदुष्टंच भुञ्जीत । इन्द्रिय-विकृति-कारकं राजसं च तामसं भोज्यं परिहर्तुं प्रयतेत ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

5- अस्तेय-व्रतम् - परपरिग्रहापमोष एवास्तेयं न, अपितु यदि वयं किंचन् अनपेक्षितं उपाद्महे तदपि स्तेयं भवति । सर्वेषां नः कृते तावद् मात्रं जगति संविधीयते यावन्मात्रं नितान्तमपेक्षामहे ।

6- अपरिग्रहव्रतम्-वस्तुजातस्य अनंगीकार एव अपरिग्रहो न भवति । शरीरस्थित्यर्थम् अनपेक्षितस्य वस्तुनः परिहारोऽपि अपरिहार्यः । व्यर्थं न किंचित् धारयेत् ।

7- स्वदेशवस्तु प्रयोगव्रतम् - अहिंसाव्रतेन मानवेन विदेश-विनिर्मिताः पदार्थाः यन्त्रनिर्मिताश्च अप्रयोज्याः । यन्त्राधीशाः स्वार्थ-सिद्धये कर्मकरान् बाधन्ते । भारतवर्षीयधनं भारतवर्षे एव अवतिष्ठेत्, देशान्तरं न संक्रामेत् एतदेव चिन्तनीयम् ।

8- निर्भीकताव्रतम्-नहि भीरुः सन् सत्यव्रतं पालयितुं कोऽपि पारयति । राज्ञो वा, चोराद्वा, बान्धवाद्वा, मित्राद्वा, मृत्योरपि वा, हिंस्रात् श्वापदाद् वा न भेतव्यम् । आत्मा आत्मबलेन रक्षणीयः ।

9- स्पृश्यत्व-भावना व्रतम् - इदं हि हिन्दुजातेः महद् दूषणम् । सर्वे मानवा विश्वसृजः प्रजाः । कश्चिद् एकां वृत्तिम् उपजीवति कश्चिदन्याम्, तत्तद्-वृत्त्या सर्वे ते अपेक्ष्यन्ते । वृत्तिविशेषवशात् तर्हि कश्चिद् स्पर्शहीनो भवति । आश्रमस्थैः समं समभावेन व्यवहरणीयम् ।

इमानि व्रतानि विशेषतो अध्यापक-वर्ग-समुन्नतये प्रकल्पितानि ।

चारुदेवशास्त्रि कृतात्
गान्धिचरितात्

=======

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पञ्चमः पाठः

भाटकभवनम्

॥ विश्वनाथ मिश्रः ॥

दिल्लीनगर्यां भाटकस्य यस्मिन् भवने मे निवासः तस्य महिमा अनिर्वचनीयः। प्रत्येकम् ऋतौ परिवर्तते ऽस्य स्वरूपम्। वर्षर्तौ तु भवनमिदं चम्पा-सदृशं भवति। शैत्याधिक्यात् प्रचुराच्छादके सत्यपि शीतकाले दन्तानां कटकटायमानता ऽपाकर्तुमशक्या। ग्रीष्मकालस्य तु कथैवान्या। महता यत्नेन कथं कथमपि क्षणमिह विश्रम्यताम्, क्षणानन्तरं तु कथमिह वर्तता मित्यन्वेषणीयो विषयः।

देहल्यां स्थानप्राप्तिः कठिनेति उपलब्धेऽस्मिन् भवने आसीन्मे महती प्रसन्नता। विचारितं मनसि-लब्धं स्थानम्। अत्रैवायास्यति मे गृहिणी। गृहस्य सर्वाण्युपकरणान्येकत्रीकृत्यसुखेन वर्तिष्ये। किन्तु अल्पावधावेव भवनाद् उद्विग्नः सर्वाणि वस्तूनि विक्रीयान्यत्रगन्तुकामो ऽस्मि।

मम गृहस्वामी नाम्ना मायापतिः। यथा नाम तथा गुण इत्याभाणकस्य सत्यापने ऽसौपटीयान्। प्रत्येकं समस्यासमाधाने प्रपंच एवाश्रीयते तेन। न च समाधीयते किमपि कदापि। मासस्य द्वितीय-दिनांके भाटकं ग्रहीतुमागते तस्मिन् भवति मे वाग्युद्धं तेनसह। मयोच्यतेद्वितीयदिनांकस्यागमने एवं विलम्बो नतु भवतामागमने ऽपि। यदि कथंचिद् भवान् स्याद् भाटकदाता तदा त्वयाऽनुभूतं स्याद् भग्नप्रायस्य विवरबहुलस्यास्य गृहस्यफलम्। श्रुत्वामदीयं वचः स्मयमानोऽसौ कथयति-अहोबलीयसी भगवन्माया यथा कृतोऽहं गृहस्वामी, भवांश्च भाटकदाता। उक्त्वा चैवं विहसत्यसौ। वर्षर्तौ गृहमिदं भवति जलक्लिन्नमित्युक्ते मयि तदुत्तरं भवति-इदं तु अतीवसमीचीनं यद् तदानीं जलाहरणस्य कष्टमपि त्वया सोढव्यं न भवति।

इदानीमेकया युवत्या सह चलति मे प्रणयसम्बन्धः। साचोत्कण्ठिता मया सह परिणेतुम्। ततः पूर्वं वांछति चासौ दर्शनं मदीयभवनस्य। तदीयसमीहा पूरणेऽहं सर्वथैवासमर्थः। न दर्शनयोग्यं मम भवनम्। दृष्ट्वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चैनद् किं कथयिष्यत्यसौ ? कस्या अपि विवाहोत्सुकाया: कन्याया विमनाय-मानता स्वाभाविकी दृष्ट्वा मदीयं भवनम् । एवं प्रकारिकया विभीषकया ग्रस्तोऽहं तथा बारम्बारं कथ्यमानस्यापि नायमवसरो मम भवनदर्शनस्य । तत्यवसरे दर्शयिष्यते तदितिन्यगादिषम् ।

एकस्मिन् दिने प्रातरेव गृहस्वामिन: सकाशं गतोऽहम् । स वातन्धामासीन: समाचार पत्रं पठन्नासीत् । अवलोकयन्नपि मामसावात्मानमपश्यन्तमिव प्रत्यापयत् । तस्यैवमभिनयं दृष्ट्वा मयोक्तम् -

"अहमागतोऽस्मि"

"बाढम् ।" आगम्यतामित्युक्तं तेन ।

"ममास्त्येकोऽधिक्षेप: ।"

"कथ्यताम्"

"भवतां गृहं नैतादृशं यत्राहं स्थातुं शक्नुयाम् ।"

"एवंचेत्तर्हि अन्यत्र गम्यताम् ।"

"अन्यत्र गमनस्य वार्ता नास्ति, किन्तु समस्यातु इयमस्ति यत् ममविवाह: सम्पत्स्यमानो वर्तते ।"

"ममापि विवाहस्तत्रैवाभूत् ।"

"तस्मिन् समये मन्ये न स्याद् एतादृशी स्थितिस्तस्य गृहस्य ।"

"इतोऽपि दयनीयतरा"

"एवंचेत् न स्यात् सम्पन्नस्त्वदीयो विवाह: ।"

श्रुत्वा चेदं मदीयं वाक्यं नेत्रे विस्फार्यावलोकयन् माम्, उत्थायोक्तं तेन-किमुच्यते त्वया ? तव वय: समानवयस्का तु मदीया कन्या वर्तते । सौदामिनि ! सौदामिनि ? इत आगम्यताम् ? इत आगम्यताम् ? इति शब्दायितं तेन । क्षणानन्तरमेवायाता सौदामिनी । दृश्यताम् ? इयमस्ति मे कन्या सौदामिनी । स्थितौ वास्यां कथं व्याहृतं त्वया यत् तव विवाहो न सम्पन्न इति ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अहंच तूष्णीं स्थितः सौदामिनीं निपुणं निरीक्षमाण एवासम्। मत्तूष्णीं तामवलोकयन्तं मां प्रेक्ष्योक्तं तेन-सौदामिनि ? गच्छेदानीमन्तः। अपगता सौदामिनी । अहंचात्मानं स्वस्थं कुर्वन्नघोषम्-नातिदूरं तद्दिनं यदा मे विवाहः सम्पत्स्यते ।

"तेन किम् ? अस्मिन्नेव गृहे सम्पन्ना नैके विवाहोत्सवाः ?" इत्युक्तं तेन ।

"यदि भवता अस्य गृहस्य परिष्कारः कार्येत तदा वरम् ।"
"किम् ? परिष्कारेण गृहमिदं स्वर्गतां यास्यति ? ।"
"अलं विवादेनानेन सहेति विचार्याहमुत्थायागतः ।

अष्टौ दिनानि व्यतीतानि ।। मम भाविन्याः पत्न्याः समीहेयं बर्धमानैवासीद् यद् दयितसदनं समवलोक्य शीघ्रतया सम्पादनीयो विवाहः । इदानीं समैधत मे दैन्यम् । कथमिव कृता मया मिथ्या स्वप्रशंसा ? सर्वसाधनसम्पन्ने भव्ये सदने मे निवासः । तत्र विराजन्ते नैके गवाक्षाः । वातायनबहुलं परिलसितं शीत-ताप नियन्त्रितं मे भवनं सर्व-सुखदं प्रियंकरं चेति" । श्रुत्वा च प्रशंसां ममगृहस्य स्मेरानना मे भाविनीदयिता । रहस्यं चास्यत्वरितमेव परिज्ञातं यद् मया सह प्रणयसम्बन्धात् प्राक् आसीदसौ अन्यासक्ता । तेन सह तस्या विवाहोऽपि निश्चितः । युवकोऽसौ कस्मिंश्चिद् कार्यालये कार्यं कुर्वाणोऽवर्तत। अनुपलब्धभवनः कस्यचिन्मित्रस्य गृहे कृतवसतिरसौ निरन्तरमितस्ततो भाटक-गृहान्वेषणपरायणोऽपि यदा न शशाक भवनमुपलब्धुं तदा तेन सह भग्नस्तस्याः प्रणयसम्बन्धः । मां प्रत्यनुरागोद्रेकसमकालमेव जिज्ञासितं तया यन्ममसकाशं किमपि गृहमस्ति न वेति ? प्रश्नमिममुत्तरयता मया चित्रिते स्वभवनस्यकृत्रिमे भव्येस्वरूपे तस्याः प्रसन्नता स्वाभाविकी ।

ममगृहस्य स्थैर्यमिव मम प्रेयस्याः साहसमप्यपूर्वम् । एकस्मिन् दिने अकस्मात् समायातासौ मदीयभवने । तस्मिन् समयेऽहं तत्रगृहे सद्यो जायमानस्य नवीन-गर्तस्य सूक्ष्मान्वेषणे लग्न आसम् । इदं तस्या अतर्कितागमनं जातं मे काकतालीय-स्तब्धताप्रयोजकम् । उक्तं तया अस्मिन्नेव भवने वससि ? श्रुत्वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

येमं प्रश्नं सद्यः संजातस्वेद बिन्दवोऽलंकुर्मदीयं शरीरम् । जिह्वा मे शुष्कतामगाद् । गिरश्च स्खलिताः । उत्तरणीयं किमपीति विचार्य स्खलद्गिरा मयोक्तम् - नोपलभ्यते पुरापि समीचीनं भवनम्। यद्युपलभ्यतेऽपि किमप्यन्यद् गृहं चेद् तदितोऽपि भ्रष्टम् । स्याद्यदि कथंचित् परिष्कारोऽस्य तदेदमेव भवनमनुपमं स्यादन्न ।

श्रुत्वा चैतन्नोक्तं तया किमपि । परं तस्या मनसि संजात उल्कापात इत्यनुभूतं मया । सा यावदवतरित मध्येकक्षं तावदेकः स्थूलो मूषकः प्रधावन् समागतः। पादयोः प्रणिपातमिवाचरन् स्पृष्ट्वा तदीयौ पादौ प्रपलायितश्च । सा चोच्चैः शब्दायमाना कम्पमाना च कथं कथमप्यवर्तत । मया विहस्योक्तम् "इमे मूषका एवेदानीं मे सहचराः"। 'तव गृहे ईदृशाः स्थूलाः सन्त्याखवः ?' एवमुक्त्वा यावत्तया निहितौ हस्तौ भित्तौ तावद् भित्तेरेकः स्थूलश्चलस्तरस्ततः पृथग् भूतो भूमौ पतितः। अयंचापरो विस्फोटो मम सरसजीवनस्य कृते ।

सर्वथैववैपरीत्यं पश्यामि यथा चित्रितं गृहस्वरूपं त्वयेत्यवोचत् सा । लज्जया दीनतया, व्यग्रतया च सहैवाक्रान्तोऽहं दीर्घकालिकं मौनव्रतमपहायावोचम्- मा भैषीः प्रिये ! विवाहात् पूर्वमेव परिष्कृतमिदं भवनं मनोजनिवासकल्पमवलोकयिष्यसि । सर्वसाधनसम्पन्ने निश्छिद्रकेऽत्र भवने मूषकानां प्रेतात्मानोऽपि नावलोकयिष्यन्ते।का खलु कथा वराकानामाखूनाम् । श्रुत्वा मदीयं वचः किमपि हृध्यमनुक्त्वा भृशं विलम्बायितमिति व्याहृत्य तडिदिवापगता सा ।

गृहस्वामिनः मायापतेरिच्छां परिवर्तयितुं सर्वो मे प्रयासो विफलः । अहम् एकदा तु भृत्यद्वारोत्थाप्य तद्गृहात् बहिष्कारितः । फलस्वरूपं कतिपयदिवसव्यापिनी खंजता मां नितरामपीडयत् ।

एकस्मिन् दिने तस्य कन्या सौदामिनी, प्रसन्नानना लघु लघु गच्छन्ती मध्येमार्गं सम्मिलिता। प्रणम्य प्रसन्नता-कारणं पृष्टा सा अचकथद् यन्मे विवाहः शीघ्र मेव समायोजयमानो वर्तते । वरश्च ममाभिलषितः । च तस्य युवकस्य नाम संकेतादिकं शालातस्य सकाशं लिखितानि मया प्रमाणियत् यो विवाहस्त्वया-

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वीकृत स्तस्य फलमपि भोक्तुं तत्परेणभाव्यम् । तव श्वसुरो यथा-नाम तथा-गुणको ऽस्ति । लोभस्य तु तस्य पराकाष्ठैव नास्ति । सर्वाणि च तस्य गृहाणि बन्धक-रूपेणदत्तानि वर्तन्ते । ये च भाडा दातारो यत्र कुत्रापि तस्य गृहेषु निवसन्ति, तैः सार्धं तस्य दैनन्दिनः कलहः । एवमपि श्रूयते यदसौ सर्वाणि गृहाणि विक्रीय तव शिरसि स्थास्यति। अहमस्मि तवैकः शुभेच्छुः । पत्राणिविलिख्य नूनमत्र भविष्यति कश्चनचमत्कार इति स्वस्थमना अहमतिष्ठम् ।

इतो मम प्रेयस्या सह मे सम्मेलनं पत्रपर्यन्तमेवावशिष्टम् । अन्तिमे पत्रे मया लिखितं यद् ममरूपोपरि, मम भाटकभवनोपरि च त्वया ध्यानं न देयम् । किन्तु ध्यानं तु त्वया केवलं ममोपर्यैव देयम् । कृपा विधेया मयि । दयस्व! दयस्व! येनावयोः परिणयो निर्विघ्नं सम्पद्येत । एकेन ज्योतिर्विदा कथितं यत् मम ग्रहाः शनैः शनैरनुकूलतामुपयान्ति । किंचिद् कालानन्तरं विभूमेः प्रसादे मेवासौ निश्चितः ।

पंचदशदिनान्यतीतानि । मम गृहस्वामिनो गृहे आसीद् महान् जनसम्मर्दः । मया विचारितं-स्यादेतद् कौतुकं मम पत्राणाम् । परं ममानुचिन्तनं वैपरीत्यमुपगतम् । आसीद् सा तत्परता सौदामिन्या विवाहस्य । अहमस्मिन्नेव समये प्राप्तवान् पत्रं प्रेयस्याः । किमत्र लिखितं स्यादिति शंकमानहृदयः पत्रं पर्यपीपठम् । तत्र लिखितमासीत् - तव भाटकभवनदर्शनानन्तरं त्वया सह वैवाहिको विचारः सर्वथैव त्यक्तः । क्षम्यताम् । प्रपठ्य पत्रमहं भूमौ न्यपीपतम् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

षष्ठः पाठः

भितरी शिलालेखाश्रित:

स्कन्द गुप्तस्य पराक्रम: ।

(अयं लेख: उत्तर प्रदेशस्य गाजीपुर- जनपदे, सैदपुर उपजनपदे भितरि- ग्रामे प्राप्त: । अस्य लेखनम् अनविंशतिषु पंक्तिषु निबद्धमस्ति । अस्मिन् महाराजस्य स्कन्दगुप्तस्य पराक्रम: वर्णित: । तस्मात् कतिचित् पंक्तय: दीयन्ते ।)

सिद्धं, सर्वराजोच्छेत्तु: पृथिव्याम् अप्रतिरथस्य चतुरुदधि सलिलास्वादित- यशसो धनदवरुणेन्द्रान्तकस्य, कृतान्तपरशो: न्यायागतानेक गोहिरण्य - कोटिप्रदस्य चिरोत्सन्नस्य अश्वमेधाहर्तु: महाराज श्रीगुप्त प्रपौत्रस्य ।

महाराज श्री घटोत्कच-पौत्रस्य महाराजाधिराज- श्रीचन्द्र गुप्तस्य लिच्छवि दौहित्रस्य महादेव्यां- कुमार देव्याम्

उत्पन्नस्य महाराजाधिराज श्री समुद्रगुप्तस्य पुत्र: तत् पादपरिगृहीतो महादेव्यां दत्तदेव्यामुत्पन्न: स्वयं चा प्रतिरथ: ।

परमभागवतो महाराजाधिराज श्री चन्द्रगुप्तस्य, तत् पादानुध्याता महादेव्यां ध्रुवदेव्यामुत्पन्न: परम भागवतो महाराजाधिराज श्री कुमारगुप्तस्य प्रथित पृथुमति- स्वभावशक्ते: पृथुयशस: पृथ्वीपते: ।

पुत्र: पितृपरिगत-पाद-पद्मवर्ती प्रथितयशा: पृथिवीपति: सुतोऽयम् प्रथित - विपुलधामा नामत: स्कन्दगुप्त: ।

पितरि दिवमुपेते विप्लुतां वंशलक्ष्मीं ।
भुजबल -विजितारि: य: प्रतिष्ठाप्यभूय: ।।
जितमिति परितोषान् मातरं सास्रनेत्राम् ।
हतरिपुरिव कृष्णो देवकीमभ्युपेये ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सप्तम: पाठ:

जीर्णधन: वणिक्

(पंचतंत्रात्)

अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्र: । स च विभवक्षयाद् देशान्तर-गमन-मना व्यचिन्तयत् ।

यत्र देशेऽथवा स्थाने भोगान् भुक्त्वा स्ववीर्यत:, तस्मिन् विभवहीनो यो वसेत् स पुरुषाधम: ।।

तथा च

येनाहंकार-युक्तेन चिरं विलसितं पुरा ।
दीनं वदति तत्रैव य: परेषां स निन्दित: ।।

तस्य च गृहे सहस्रलोहभारघटिता पूर्वपुरुषोपार्जिता तुलासीत् । तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थित: । तत: सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुन: स्वपुरमागत्य तं श्रेष्ठिनम् अकथयत् । "भो: श्रेष्ठिन् ! दीयतां मे सा निक्षेपतुला । स आह,-'भो:, नास्ति । सा त्वदीया तुला मूषिकैर्भक्षिता"। जीर्णधन आह।"भो: श्रेष्ठिन्, नास्ति दोषस्ते यदि मूषिकैर्भक्षितेति । ईदृगेवायं संसार: । न किंचिदत्र शाश्वतमस्ति । परमहं नद्यां स्नानार्थं गमिष्यामि । तत् त्वमात्मीयं शिशुमेनं धनदेव नामानं मया सह स्नानोपकरणहस्तं प्रेषय इति"। सोऽपि चौर्यभयात् तस्य शंकित: स्वपुत्रमुवाच - "वत्स ! पितृव्योऽयं स्नानार्थं नद्यां यास्यति । तद् गम्यतामनेन सार्धं स्नानोपकरमादाय "।

अथासौ वणिज: शिशु: स्नानोपकरणमादाय प्रहृष्टमना: तेनाभ्यागतेन सह प्रस्थित: । तथानुष्ठिते वणिक् स्नात्वा तं शिशुं नदीगुहायां प्रक्षिप्य तद् द्वारं बृहच्छिलया आच्छाद्य सत्वरं गृहमागत: । पृष्टश्च तेन वणिजा- "भो अभ्यागत, कथ्यतां कुत्रमे शिशु: यस्त्वया सह नदीं गत: इति"। स आह, "नदीतटात् स श्येनेन हृत: इति"। श्रेष्ठी आह-"मिथ्यावादिन् ! किं क्वचिच्छ्येनो बालं हर्तुं शक्नोति । तत् समर्पय मेसुतम्, अन्यथा राजकुले निवेदयिष्यामि इति "। स आह ! "भो: सत्यवादिन् । यथा श्येनो बालं न नयति तथा मूषका अपि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सहस्रलोहभारघटितां तुलां न भक्षयन्ति । तदर्पय मे तुलाम् यदि दारकेण प्रयोजनम् ।"
एवं तौ विवदमानौ द्वावपि राजकुलं गतौ । तत्र श्रेष्ठी तारस्वरेण प्रोवाच -"भोः अब्रह्मण्यम् अब्रह्मण्यम् । मम शिशुरनेन चौरेणापहृतः"। अथ धर्माधिकारिणः तम् ऊचुः -"भोः समर्पयं श्रेष्ठिसुतम्"। स आह "किं करोमि, पश्यतो मे नदीतटाच्छयेनेन अपहृतः शिशुः"। तच्छ्रुत्वा ते प्रोचुः"भोः न सत्यमभिहितं भवता । किं श्येनः शिशुं हर्तुं समर्थो भवति"? स आह, "श्रूयतां मद्वचः -

तुलां लोहसहस्रस्य यत्र खादन्ति मूषिकाः ।
राजंस्तत्र हरेच्छयेनो बालकं नात्र संशयः ।।"

ते प्रोचुः-"कथमेतद्", ततः स श्रेष्ठी सभ्यानामग्रे आदितः सर्वं वृतान्तं निवेदयामास । ततस्तैः विहस्य द्वावपि तौ परस्परं संबोध्य तुलाशिशु-विनिमयेन संतोषितौ ।

अष्टमः पाठः

भरतस्य त्यागः

भरतः - यावद् भविष्यति भवन् नियमावसानं तावद् भवेयमिह ते नृप! पादमूले ।

रामः-मैवं, नृपः स्वसुकृतेरनुयातु सिद्धिं
मे शापितो, न परिरक्षसि चेद् स्व राज्यम् ।।१।।

भरतः - हन्त ! अनुत्तरम् अभिहितम्, भवतु, समयतस्ते राज्यं परिपालयामि ।

रामः - वत्स ! कः समयः !

भरतः - मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुमिच्छामि ।

रामः - एवमस्तु ।

भरतः - आर्य! अन्यमपि वरं हर्तुम् इच्छामि ।

रामः - वत्स ! किमिच्छसि !

भरतः - पादोपभुक्ते तव पादुके म एते प्रयच्छ प्रणताय मूर्ध्ना ।
यावद् भवान् एष्यति कार्यसिद्धिं, तावद् भविष्यामि अनयोः विधेयः ।।२।।

सीता - आर्यपुत्र! ननु दीयतां प्रथमयाचनं भरताय ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रामः - तथास्तु वत्स ! गृह्यताम् ।

भरतः - अनुगृहीतोऽस्मि ।

रामः - वत्स ! राज्यं नाम मुहूर्तमपि नोपेक्षणीयम् । तस्मादद्यैव प्रति- निवर्ततां कुमारः ।

सीता- हन्त ! अद्यैव गमिष्यति कुमारः ।

रामः - अलमति-स्नेहेन, अद्यैव गमिष्यति । प्रतिनिवर्ततां कुमारः ।

भरतः - आर्य । अद्यैवाहं गमिष्यामि ।

सुमन्त्रः - आयुष्मन् - मयेदानीं किं कर्तव्यम् ।

रामः- तात ! महाराजवत् परिपाल्यतां कुमारः ।

सुमन्त्रः - यदि जीवामि तावत् प्रयतिष्ये ।

रामः - वत्स ! आरुह्यतां, ममाग्रतो रथः ।

भरतः - यदाज्ञापयत्यार्यः ।

(भासकृतप्रतिमानाटकात्)

अभ्यासः

----

1 - भासेन कानि अन्यानि नाटकानि रचितानि ?

2 - "अलमति स्नेहेन" कथम् 'स्नेहेन' शब्दे तृतीया ?

3 - (1) समयः - अस्य कोऽर्थः ?
    (2) विधेयः-अस्य कोऽर्थः ?

4 - अभिहितम् ? अस्मिन् पदे धातुः कः ?

5- सन्धि विश्लेषणं कुर्वन्तु---------नोपेक्षणीयम्, आज्ञापयत्वार्यः, पादोपमुक्तो,

6- प्रयतिष्ये ---------कस्मिन् लकारे, पदे वचने च ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नवमः पाठः

निकुब्जाः

समये प्रगते समाजे वसन्तो वयं प्रायोऽप्रगतमनुष्याणां विषये बहु अल्पं एव जानीमः । अद्यापि संसारे एतादृशा मानवा वसंति येषां विषये इयं शंका भवति यद इमे मनुष्याः सन्ति उत पशवः । मनुष्याणामेका एतादृशी जातिः अफ्रीका-महाद्वीपस्य कांगो-नदस्य सहायकनदी ईतुरीनामिकायाः तटवनेषु वसति । इमे निकुब्जाः कथ्यन्ते ।

एतेषामाकारः प्रायो वामनेभ्योऽपि अनुच्चो भवति किन्तु शरीरं दृढं घनं च भवति । टंगे बहु छाते ह्रस्वे च भवतः किन्तु बाहू शरीरानुपातेन दीर्घौ स्तः । शरीरस्य वर्णः मृत्तिकावद् पीतः । इमान् दृष्ट्वा सर्वप्रथमं तु इदमेव प्रतिभाति यदिमे वनमानुषाः । किन्तु वस्तुतः ते मनुष्याः सन्ति । यतो हि तेषां मध्ये मानवोचिता भावना: पर्याप्तरूपेण मिलन्ति। यथा हि ते परस्परं भोजनं बलात् गृहीत्वा न खादन्ति। अन्योऽन्यस्य सहायतां कुर्वन्ति । तेषां न केवलं दृढः पारिवारिकः एव सम्बन्धः अपितु तु संघटन-सम्बन्धा अपि दृढा भवन्ति । तेषु दया प्रेम प्रभृतयोऽपि पर्याप्तिमात्रायां सन्ति ।

मनुष्येषु नीग्रोजातयः एव अप्रगता मन्यन्ते किंतु निकुब्जाः तु तेषामपि दृष्टौ अविकसिताः । निग्रोपुरुषा अफ्रीकीयाः शबराः । निकुब्जाः खर्वाकारा पुष्कसाः । शबरा निकुब्जान् तथैव दासीकुर्वन्ति यथा किंचित्पूर्वम् अमेरिका-देशीया आर्याः अफ्रीकीय-शबरान् दासीकृतवन्तः। ×

इमे निकुब्जाः एतादृशे भयंकरे बने वसन्ति यत्र कोऽपि सभ्यो मनुष्यः प्रवेष्टुमपि साहसं न करिष्यति । ते यायावरा धनुर्धारिणश्च । ते स्ववाणस्य शिलीषु विषमपि लिम्पन्ति । येन लघुभिरपि वाणैः ते विशालम् पशुमपि हन्तुं समर्थाः । ते अग्निमुत्पादयितुं न जानन्ति किन्तु तं रक्षितुं जानन्ति । अग्नेः सहायतया तेस्वं भोजनं पचन्ति । दुर्गमवनवासित्वादेव इमे उचितां प्रगतिं कर्तुं समर्था नाभूवन् । भोजनाय मितस्ततो भ्रमन्तः ग्रामादिनिर्माणाय ते अवसरं न लभन्ते । एषां वसतीनां नाम दलस्य नायकस्य नाम्ना भवति । नायके मृते

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust (25)

गते परिवर्तिते वा वसते: नाम परिवर्तते ।

अफ्रीकायां प्राय: शबरा एव भूमिपतय: । ते कृषाणा: सन्ति । ते प्राय कुसो: कदल्या च कृषिं कुर्वन्ति । केचिद् निकुब्जा: शवराणां क्रीतदासवत् सेवां कुर्वंति । भोजनस्य लाभमात्राय निकुब्जानां दलानि आजीवनं शबराणां गृहे आखेटं कुर्वन्ति वन्य-पदार्थानां संग्रहं च विदधति । भोजनस्य कृते ते आत्मानं वस्तुत: शबराणां हस्ते विक्रीय जीवन्ति । तेषां स्त्रिय: बाला: सर्वे एव रूपं सर्वतो रुद्ध्वा तं मारयन्ति । ते स्वयं बाणनिर्माणं न जानन्ति । शबरा एव तेभ्यो बाणान् ददति । यदा बाणेन कोऽपि विशालो रूपो हन्यते तदा सम्पूर्णे ग्रामे हर्षस्य समुद्र: तरंगायते । स रूप: सर्व सदस्येभ्यो बंट्यते । सर्वैर्नृत्यन्तो गायन्त उत्सवं मानयन्तो भुंजन्ति । वयं सभ्या: स्म।अस्माकं गृहे आवश्यकताया अधिकं भोजनं सदा तिष्ठति । वयं किंचिद् खादाम: । ~~अधिकं सूक्ष भोजनस्य किं महत्व किमिति एकाया~~ किंचिन्नाशयाम:, अधिकं खादित्वा रोगिणो भवाम: । वयं तेषां जीवनस्य मूल्यांकनं कर्तुं कथं क्षमा: स्म। तेषां कृते भोजनस्यकिं महत्व मिति एकाया घटनाया स्पष्टं भविष्यति →

एकबारं जना: एकां निकुब्जां डाकिनीमाशंक्य मारितवन्त: । यदा शरीरपरीक्षणेन ज्ञातं यत् सा विषवती नास्ति तदा तां खादितवन्त: । तैः विचारितम् ईदृशं सुन्दरं मांसं नष्टं न भवेत् । यदा तस्यामहिलाया: कुटुम्बिनो महिलाया मारणाय दण्डं ग्रहीतुमागता: तदा तत्र प्रत्येकस्मैं एका एका कदलीदत्ता। ते संतुष्टा भूत्वा गृहं प्रत्यावर्तिता: । वनमानुषाणां मांसं निकुब्जा: प्राय एव खादन्ति ।

इमे प्राय: शुष्कपत्रैः निर्मितेषु नीडेष्वेव वसन्ति । गृहे काऽपि सम्पत्तिर्न भवतीति कपाटस्य आवश्यकतैव न भवति । प्रायस्ते बहिरेव काष्ठाग्नि-निकटे काष्ठ-यष्टेषु शरीरं तापयन्त: स्वपन्ति । वर्षासु कदाचित् वृक्षजंघेषु सपत्रां शाखां तन्वन्ति । सभ्यताया विकासेन सह इयं जाति: ह्रासं गच्छन्ती इव प्रतिभाति । यथा हि अमेरिकीया आर्या: शबरान् शोषितवन्त: तथैव अधुना: शबरा: तान् निकुब्जान् पीडयन्ति । गौरांगा: तु निकुब्जान् पशून् मन्यमाना: तेषामपि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आखेटमपि कृतवन्तः । किन्तु अधुना आखेटः समाप्त एव तथाऽपि दिने दिने तेषां संख्या ह्रासं गच्छति ।

निकुब्जानां मुखे कठोरताया एव दर्शनं भवति । ते पीडासहने धीराः । कदाऽपि कोऽपि निकुब्जो रुदन् न दृश्यते - कियदपि कष्टं पीडा वा न भवेत् । किन्तु भोजनं तेषां दुर्बलता । मधुनाम्नो तेषां मुखं लालायते, ते अंगुलिं मुखे कृत्वा चमच्चमत्कुर्वन्ति।

ते दन्तान् प्रस्तरादिभिः घर्षित्वा निशितान् कुशाग्रान् च कुर्वन्ति । एतादृशा दन्ताः तेषां मध्ये सौन्दर्य प्रतीकानि मन्यंते । निकुब्जाः स्त्रियः उपरि~~ष्ठे~~स्थे ओष्ठे एकं छिद्रं कुर्वन्ति तत्र च गजदन्तस्य शलाकां धारयन्ति । वस्त्राणि सदा वृक्षवल्कलानां भवन्ति । आभूषणानि काष्ठस्य । आनने च काष्ठकोकिलेन रक्तमस्या वा लिखिताः पत्रलेखाः भवन्ति । कीदृशं बीभत्सं रूपं प्रतीयते । तेषां प्रांशुता केवलम् सपादमीटरं भवति ।

संघर्षः ~~[illegible]~~

१- निकुब्जाः कुत्र वसन्ति ?

२- ते कथम् अफ्रीकीयशबराणां हस्ते आत्मानं विक्रीय जीवन्ति ।

३- ते 'रूपं' सर्वतो रुद्ध्वा घ्नन्ति - अत्र रूपस्य कोऽर्थः ?

४- 'बीभत्सं रूपं निकुब्जानाम् - अत्र रूपस्य कोऽर्थः ?

५- भारतीयानां केषांचित् अप्रगतानां जातीनां नाम निवासक्षेत्रं च लिख ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दशमः पाठः

जानकी-वनवासः
(उत्तररामचरितात्)

।ततः प्रविशति रथारूढा सीता सारथिर्लक्ष्मणश्च।

लक्ष्मणः-एष स्थितो रथः, तदवतरतु देवी ।

सीता -(अवतीर्य परिक्रामति)

लक्ष्मणः-सुमन्त्र ! दीर्घमार्गपरिश्रान्ता एते तुरंगमास्तद् विश्रामय एतान् ।

सुमन्त्रः-यदाज्ञापयति देवः । (इति रथमधिरूह्य निष्क्रान्तः।)

लक्ष्मणः-(परिक्रम्य आत्मगतम्) समादिष्टोऽहमार्येण-"वत्स लक्ष्मण ! त्वं गंगागमनव्याजेन सुमन्त्राधिष्ठितं रथमारोप्य सीतादेवीं कस्मिंश्चिद् वनोद्देशे परित्यज्य निवर्तस्व" इति । तदहमपि देवीं वनमुपनयामि ।

सीता- ~~अयि~~ वत्स लक्ष्मण ! कियद्दूरे भगवती भागीरथी वर्तते ?

लक्ष्मणः-आर्ये ! आसन्नैव भगवती भागीरथी । संप्राप्ता एवं ~~वयम्~~ । शनैः शनैरेतु मुहूर्तमार्या ।

सीता-वत्स ! सुष्ठु परिश्रान्तास्मि, एतस्यां पादपच्छायायां मुहूर्त्तमुपविश्य विश्रमिष्यामि ।

लक्ष्मणः-यदभिरुचितं देव्यै ।

सीता-(उपविश्य विश्रान्तिं नाटयति)

लक्ष्मणः-(आत्मगतम्)एषा विश्रान्ता सुखोपविष्टा च देवी। तदयमेवावसरो यथावस्थितं व्यवसितुम्। (सहसा पादयोर्निपत्य प्रकाशम्) अयमनवरतप्रवासदुःखभागी निर्लक्षणो लक्ष्मणो विज्ञापयति- स्थिरी क्रियतां हृदयम् ।

सीता- (ससम्भ्रमम्) अपि कुशलमार्यपुत्रस्य? अम्बया कैकेय्या पुनरपि समादिष्टो वनवासः ?

लक्ष्मणः -आर्येण ।

सीता-किन्विदम् ? वत्स ! परिस्फुटं कथय ।

लक्ष्मणः- किमपरं कथयामि मन्दभाग्यः ?

त्यक्ता किल त्वमार्येण चारित्र्यगुणशालिना ।
मयापि किल गन्तव्यं त्यक्त्वा त्वामिह कानने ।।।

सीता-हा तात! (मोहं गच्छति, प्रत्यागम्य) वत्स लक्ष्मण ! किमुपालभ्यास्मि परित्यक्ता?

लक्ष्मणः-कीदृशो देव्या उपालम्भः ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सीता-अहो मे धन्यत्वम्, किमुपालम्भमात्रेण विना निगृहीतास्मि ।
किमस्ति, किमपि तेन सन्दिष्टम् ?

लक्ष्मण:-अस्ति –

सीता-कथय, कथय ।

लक्ष्मण:-अयमार्यस्य संदेश:-

तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति,
दु:खे सुखे च सुचिरं सहवासिनीति ।
जानामि केवलमहं जनवादभीत्या,
सीते! त्यजामि भवतीं न तु भावदोषात् ।।2।।

सीता-किं जनवादभयेनेति ? किमपि वचनीयं मे अस्ति?

लक्ष्मण:-कीदृशमार्याया वचनीयम् ?

ऋषीणां लोकपालानामार्यस्य मम चाग्रत: ।
अग्नौ शुद्धिं गता देवी किन्तु लोको निरंकुश: ।।3।।

आर्यं प्रति देव्या: क: प्रतिसंदेश: ?

सीता-एवं गतेऽपि प्रतिसंदेश: ! मम वचनादार्यपुत्रं विज्ञापय मन्दभागिनीं मामनुशोचन् आत्मानं न बाधय, सद्धर्मे स्वशरीरे च सावधानो भवेति । अपि च एषा तपोवनवासिनी, निर्गुणा, चिरपरिचितेति वा, अनार्येति वा, सीतेति वा स्मरणमात्रकेणानुग्रहीतव्येति ।

लक्ष्मण:-इमं संदेशमाकर्ण्य क्षते क्षारमिवाहितम् ।
दशामसह्यां शोकस्य व्यक्तमार्यो गमिष्यति ।।4।।

सीता-वत्स लक्ष्मण ! आसन्नास्तमय: सूर्य:, उड्डीना: पक्षिण:, संचरन्ति श्वापदा: । गच्छ, न युक्तं परिलम्बितुम् ।

लक्ष्मण:-(सोद्वेगम्)

आर्यां स्वहस्तेन वने विमोक्तुं,
श्रोतुं च तस्या: परिदेवितानि ।
सुखेन लंकासमरे हतं माम्
अजीवयन् मारुतिरात्तवैर: ।।5।।

(परितो विलोक्य)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एते रुदन्ति हरिणा हरितं विमुच्य,
हंसाश्च शोकविधुरा: करुणं रुदन्ति ।
नृत्तं त्यजन्ति शिखिनोऽपि विलोक्य देवीं,
तिर्यग्गता वरममी न परं मनुष्या: ।।6।।

(अंजलिं बद्ध्वा) देवि ! सर्वपश्चिमोऽयं लक्ष्मणस्य प्रणामांजलि:, विज्ञापयामि

च देवीम् ।

आर्ये मित्रं बान्धवान् वा स्मरन्त्या,
शोकादात्मा मृत्यवे नोपनेय: ।
इक्ष्वाकूणां सन्ततिर्गर्भसंस्था,
सेयं देव्या यत्नतो रक्षणीया ।।7।।

अपरंच-

ज्येष्ठस्य भ्रातुरादेशादानीय विजने वने ।
परित्यक्तासि देवि त्वं दोषमेकं क्षमस्व मे ।।8।।

(दिशोऽवलोक्य) भो भो लोकपाला: ! शृण्वन्तु भवन्त: ।

एषा बधूर्दशरथस्य महारथस्य,
रामाह्वयस्य गृहिणी मधुसूदनस्य ।
निर्वासिता पतिगृहाद् विजने वनेऽस्मिन् ।
एकाकिनी वसति रक्षत रक्षतैनाम् ।।9।।

एनामपि रघुकुलदेवतां भगवतीं भागीरथीमार्याया: कृते विज्ञापयामि ।

देवी यदा च सवनाय विगाहते त्वां,
भागीरथि ! प्रशमय दर्पमंबुवेगम् ।
जातश्रमां कमलगंधकृताधिवासै:,
कालै:त्वमप्यनुगृहाण तरंगवातै: ।।10।।

सख्यो नद्य: स्वामिनो लोकपाला:,
मातर्गंगे ! भ्रातर: शैलराजा: ।
भूयो भूयो याचते लक्ष्मणोऽयं,
यत्नाद् रक्ष्या राजपुत्री गतोऽहम् ।।11।।

(प्रणम्य निष्क्रान्त:)

सीता-कथं सत्यमेव मामेकाकिनीं परित्यज्य गतो लक्ष्मण: ?

(विलोक्य) हा धिक् ! ! अस्तमित: सूर्य: । स्वरेणापि लक्ष्मणो न दृश्यते । हरिणा अपि स्वकमावासमायान्ति, निर्मानुषं महारण्यम् । किं करोमि मन्दभाग्या (इति मोहं गच्छति) ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(ततः प्रविशति वाल्मीकिः)

सीता-(प्रत्यागम्य) क एष मां वीक्षते । (सहर्षम्) वत्स लक्ष्मण ! प्रतिनिवृत्तोऽसि ?

वाल्मीकिः-नाहं लक्ष्मणः ।

सीता-(आत्मगतम्) अत्याहितम्, अन्य एष को वा पुरुषः ? कथमिदानीं वारयिष्यामि। महाहितम् (प्रकाशम्) स्त्री अहमेकाकिनी च ।

वाल्मीकिः-एष स्थितोऽस्मि । वत्से ! तवाप्यलं परपुरुषशंकया। मुनिदारकेभ्यः त्वद्वृत्तान्तमुपलभ्य तपोधनोऽहं त्वामेवान्वेष्टुमुपागतः।, पृच्छामि चात्रभवतीम्-

धर्मेण जितसंग्रामे रामे शासति मेदिनीम् ।
कथ्यतां कथ्यतां वत्से! विपदेषा कुतस्तव ॥2॥

सीता-तत एव पूणचन्द्रान्मेऽशनिपातः ।

वाल्मीकिः-कथं रामादेव हि विपत्तिमुपागता ?

सीता-अथ किम् ।

वाल्मीकिः-यदि त्वं वर्णाश्रमव्यवस्थाभूतेन महाराजेन निर्वासिता ततः स्वस्ति भवत्यै, गच्छाम्यहम् ।

(परिक्रामति)

सीता-अथ विज्ञापयामि ।

वाल्मीकिः-कथय ।

सीता-यदि रघुवरेण निर्वासितेति भवता नानुकम्पनीया, एषा पुनर्गर्भगता रघुसगरदिलीपदशरथप्रभृतीनां सन्ततिरिति इदानीं प्रतिपालनीया ।

वाल्मीकिः-(प्रतिनिवृत्य) कथमिक्ष्वाकुवंशमुदाहरसि ? तदनुयोक्ष्ये । वत्से ! किं च दशरथस्य वधूः ?

सीता-यद्भगवानाज्ञापयति ।

वाल्मीकिः-किं च विदेहाधिपतेर्जनकस्य दुहिता ?

सीता-अथ किम् ।

वाल्मीकिः-किं च सीता ?

~~सीता-न हि सीता, भगवन् । मन्दभागिनी~~ ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सीता-न हि सीता, भगवन् ! मन्दभागिनी ।

वाल्मीकिः-हा हतोऽस्मि मन्दभाग्यः । किं कृतेऽयमत्रभवत्याः प्रसादतलाद

अधोऽवतारः ?

सीता-(लज्जां नाटयति)

वाल्मीकिः-कथं लज्जते । भवतु, योगचक्षुषाऽहमवलोकयामि । (ध्यानमभिनीय)

वत्से ! जनापवादभीरुणा रामेण केवलं परित्यक्ता, न तु हृदयेन ।

निरपराधा त्वमस्माभिरपरित्याज्यैव । एह्याश्रमपदं गच्छावः ।

सीता-को नु भवान् ?

वाल्मीकिः-श्रूयताम् ।

सोऽहं चिरन्तनसखा जनकस्य राज्ञः

तातस्य ते दशरथस्य च बालमित्रम् ।

वाल्मीकिरस्मि विसृजान्यजनाभिशंकां

नान्यस्तवाऽहमबले ! श्वशुरः पिता च ॥3॥

सीता-भगवन् ! वन्दे !

वाल्मीकिः:वीरप्रसवा भव, भर्तुश्च पुनर्दर्शनमाप्नुहि ।

सीता-त्वं लोकस्य वाल्मीकिः मम पुनस्तात एव । तद् गच्छाव आश्रमपदम् ।

॥इति निष्क्रान्तौ॥

॥अभ्यासः॥

1-श्रेणीकार्यम्

॥अ॥ रामस्य कः सन्देशः लक्ष्मणेन सीतायै प्रदत्तः ?

॥आ॥सीतया कः सन्देशः रामाय प्रेषितः ?

~~॥इ॥ महर्षिः वाल्मीकिः योगबलेन सीता विषयकं किं पृष्टम् भगवान् ?~~

इ ॥ई॥एतेषां शब्दानामर्थाः लेख्याः ।

उपालम्भः, ~~स्खलितम्~~, अत्याहितम्, वीरप्रसवा, निरंकुशः, मारुतिः

शिखिनः, अत्रभवतीम् ।

॥उ॥निम्नलिखितानां पदानां स्वरचितेषु वाक्येषु प्रयोगः कर्तव्यः ।

जनवादभीत्या, क्षतेक्षारम्, अथकिम्, हन्त ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कोऽपि कम्बलं दास्यति ? न जाने कियदवशिष्टं वर्तते यद् समाप्तिमेव न आयाति । अहं ब्रवीमि त्वं कृषिं कुतो न त्यजसि ? मृत्वा-मृत्वा श्रमं कुरु, यदा उत्पत्तिर्भूयात् तदा अवशिष्टं दद्याः ! इति न मम, न मम !! अवशिष्ट-प्रत्यावर्तनाय किल नो जन्म बभूव । उदर-निमित्तं भृतिं कुरु । मा तावद् ईदृशी कृषिः भूद ! अहं रूप्या न दास्यामि, न दास्यामि ।

हल्कुः विमनाः भूत्वा अवादीद्-तर्हि किं गल्हीः शृणुयाम् ।

मुन्नी सदर्पम् अकथयद्-गल्हीः कुतो दास्यति? किं तस्य राज्यं वर्तते ?

परम् एतावत्कथनसमकालमेव तस्याः भ्रूभंगः शिथिलः संजातः । हल्कोः तस्मिन् वाक्ये परुषं सत्यमासीद् । यद्वत् घोरः श्वापद इव गूरति स्म ।

सा गत्वा आलात् रूप्या निष्कास्य हल्कोः करे अर्पितवती, अब्रवीद्-इतः प्रभृति त्वं कृषिं त्यज । भृतिकर्मणि एका चर्पटी तु सुखेन अत्तुं प्राप्येत् कस्यापि भयं तु न स्यात् । शोभना एषा कृषिः ! श्रमं कृत्वा आनय, तदपि प्रक्षेपय, उपरिष्टाद् तर्जनं चापि सहेथाः ।

रूप्या आदाय स्वहृदयं निष्कास्य दातुमुद्यत इव हल्कुः बहिर्निर्गतः । श्राम्यता तेन पणशः तिस्रो रूप्या कम्बलार्थं संचिताः । ता अद्य निर्गताः भवन्ति । प्रतिपदं तस्य शिरः स्वदैन्यभरेण अवनतं जायते ।

× ———— × ———— ×

पोषस्य तिमिराच्छन्ना रात्रिः ! गगने तारका अपि शैत्येन कंपमाना इव प्रतीयन्ते । हल्कुः स्वक्षेत्रतो बहिः इक्षुपर्णानाम् आतपत्रस्य अधो वंशखट्वायां स्वकीयेन पुराणेन आच्छादनेन आत्मानं आच्छाद्य शयानः कंपते । खट्वाया अधस्तात् तस्य सहचरो जबरो नाम कुक्कुरः स्वमुखम् उदरे निवेश्य शैत्येन कूं-कूं कुर्वाणः शेते । उभयोः एकमपि निद्रा न अभ्येति । ग्रीवायां जानुनी संसज्जयन् हल्कुः अवोचत्-"किं रे जबर !, अपि शीतं बाधते ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एकादशः पाठः

पौषस्य रात्रिः

[स्व0 प्रेमचन्दो हिन्दी - भाषाया बहु-लेखन-प्राप्तयशाः कथालेखक उपन्यासकारश्च । स गान्धीमतानुयायी स्वदेशीयान्दोलनेन सम्बद्धः साहित्यकारः स प्रायो ग्रामीणानां शोषणमधिकृत्य कथानकं रचयति स्म । तेन हंसनाम्नी एका हिन्दी कथा-मासिकी अपि किंचित्कालं प्रचालिता । तस्य शताब्दी बहु समारोहेण हिन्दीक्षेत्रे मानिता । केचिदुत्साहवन्तो हंस-मासिकीं पुनः प्रारभन्त । तस्येयं भावमयी रचना लक्ष्मणपुर-राजकीयायुर्वेदमहाविद्यालये सम्पादकेन पं0 माधवाचार्येण अनूदिता । सरला ग्रामीणाः कृषकाः कथं कष्टे जीवनं यापयन्ति स्म, कथं च तेषां श्रमस्य लाभं मध्यस्था गृहणन्ति स्म इत्यस्य चित्रणं हृदयस्पर्शि रूपेण कृतम् -सम्पादकः]

हल्कुः आगत्य पत्न्यै अकथयत्-सहना आगतो वर्तते, या रूप्याः स्थापिताः सन्ति, ता आनय, तस्मै प्रदास्यामि, यथा कथमपि कण्ठमोचनं स्यात् ।

मुन्नी सम्मार्जयन्ती आसीत् । विवृत्य उक्तवती- त्रिंशः एव तु रूप्याः सन्ति, दास्यसि चेत् कम्बलं कुत आगमिष्यति? माघ-पौषस्य रात्रीः क्षेत्रे कथं गमयिष्यसि ? तस्मै कथय, शस्यसंग्रहकाले दास्यामः, न तु इदानीम् ।

हल्कुः क्षणं यावत् अनिश्चितदशायां तस्थौ । पौषः शिरसि आपतितः, कंबलं बिना रात्रौ क्षेत्रे शयितुं स कथमपि न शक्तः । किंतु सहना नैव स्वीकरिष्यति, त्रासयिष्यति, गर्हीः दास्यति च । शीते म्रियेय न भयम् इदानीं तु शिरस्तः संकटमपसरिष्यति इति विचारयन् स स्वपृथुलं शरीरम् आदाय स्त्रियाः समीपमुपगतः चाटुपूर्वकं च अब्रवीत्-आनीय देहि, उत्तारो भवेत् । कम्बलार्थम् उपायान्तरं विचारयिष्यामि ।

मुन्नी झगिति दूरमपसृता, नेत्राभ्यां तं तर्जयन्ती च अवादीत्- कृतवानसि उपायान्तरम् ! ननु श्रोष्यामि कमुपायं करिष्यसि ? किं विनैव मूल्यं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

किं मया नोक्तमासीत् गृहे पलाले स्वपिहि, अत्र किं लब्धुमागतः ? इदानीं शीतं भुङ्क्ष्व, अहं किं करोमि ? अज्ञानी: यदहं मोदक-पूरिकां भोक्तुं निःसृतः यद् धावं-धावम् अग्रे प्रचलितः । तत्साम्प्रतं स्वमातामह्याः नाम्ना रुदिहि ।"

शयान एव जबरो लांगूलमचालयत् । एकदा स्व-कूँकूम् दीर्घीकुर्वन् जृम्भां कृत्वा तूष्णीमभूत् । संभवतः तस्य कुक्कुरबुद्धिः बुबुधे यन्मम कूँ-कूँ करणात् स्वामिनो निद्रा न आयाति ।

हल्कुः स्वकरं बहिः निष्कास्य जबरस्य शीतलं पृष्ठं स्नेहेन संस्पृशन् अब्रवीत्-"श्वः प्रभृति मया सह अत्र मा आगमः नो चेत् चिराय शीतलो भविष्यसि । आततायी अयं पश्चिमपवनः न जाने कुतः हिमं नीत्वा आगच्छति । उत्थास्यामि पुनरेकदा "चिलमं" भरिष्यामि । कथमपि रात्रिस्तु व्यतीयात् । अष्ट चिलमानि पीतानि मया। अयं कृषेः आनन्दः । भाग्यवन्तश्च तादृशाः सन्ति येषां निकटे शीतं व्रजेत् चेत् भिया पलायेत । स्थूल=स्थूलानि तल्पानि नीशाराः कंबलानि च । किं परिहासः शीतेन तत्र प्रवेशः । तेषाम् अहो भाग्यत्वम् । कर्म वयं कुर्मः, आनन्दं ते लुण्टन्ति ।"

हल्कुः चिलमं पिबन् उवाच-"अपि चिलमं पास्यसि ? शैत्यं तु कुतः अपसरिष्यति, आम्, किंचिन्मनः परिवर्तते ~~भवति~~ ।

जबरः तन्मुखं प्रेमबाष्पपूरितया दृशा द्रष्टुमारेभे ।

हल्कुः-"अर्धमात्रं शीतं सहस्व । श्वस्तः अहमत्र पलालं प्रसारयिष्यामि. तत्रैव प्रविश्य स्थास्यसि । तदा शैत्यं न लगिष्यति ।"

जबरः स्वपादतले तस्य जानुनी अस्थापयत् स्वमुखं तस्य मुखस्य निकटमनयच्च । तस्य उष्णोच्छ्वासाः हल्कुं पस्पृशुः ।

चिलमं पीत्वा स पुनः शिश्ये । यद्वा भवतु, अहं साम्प्रतं निद्रास्यामि इति निश्चयपूर्वकं शिश्ये । तथापि क्षणेनैव तस्य हृत्कंपः समजनि । एकदा एकपार्श्वे शेते, अपरक्षणे अन्यपार्श्वे शेते । तथापि शैत्यं पिशाचवत् तस्य उरसि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आसनबंधपूर्वकमासीनं तिष्ठति ।

यदा कथमपि स्थातुमशक्यमभूत् तदा तेन जबरो मृदु उत्थापितः, तस्य शिरः थप्थप्कुर्वन् तं स्वक्रोडे अशाययत् । कुक्कुरकाये न जाने कीदृशं पूतिगन्धमासीत् किंतु स तं स्वक्रोडे आश्लिष्य आत्मानं तथा सुखिनमनुभवति स्म यथा ह्यनेकमासेभ्यः तेन नानुभूतमासीत् । जबरस्तु प्रायः स्वर्गसुखमत्रैव विराजत इति बुबुधे । हल्कोः प्रयते आत्मनि तु तं कुक्कुरं प्रति तिरस्कारलेशोऽपि नासीत् । एतावत्यैव तत्परतया स स्वस्य कस्याप्यभिन्नमित्रस्य भ्रातुर्वा कण्ठाश्लेषंकरिष्यत् यया स अद्य इमाम् अवस्थां प्रापितः न तु स स्वदीनतया हतः । नहि एवं प्रतीयते स्म, यदनया विशिष्टया मैत्र्या तस्य आत्मनः सर्वद्वाराणि उद्घाटितानि, तस्य सर्वे अणु-परमाणवः दीपिताः ।

सहसा जबरः कस्यापि पशोः ध्वनिं लेभे । अनेन विशिष्टप्रेमस्पर्शेन तस्मिन् काऽपि नवा स्फूर्तिः प्रादुर्भूता आसीत् यत्कारणात् स शैत्यस्य प्रहारं तृणाय अमन्यत । स झटिति उत्थाय उटजात् बहिरागत्य भषितुमारेभे । हल्कुः असकृत् तं प्रेम्णा आकारयद् किंतु स तस्य समीपं न अगात् । कर्तव्यं तस्य हृदि मनोरथरूपेणउच्छलत् आसीत् ।

ततोऽपि एका होरा व्यतीता । रात्रिः वायुना शैत्यं विवर्द्धयितुमारेभे । हल्कुः उत्थायोपविष्टः, उभे जानुनी उरसा संमील्य शिरस्तस्मिन्नगोपायत् । तथापि शैत्यं न्यूनं न जातं देहस्य रक्तजातं हिमायितं, धमनीषु रक्त-स्थाने हिमं प्रवहति इति एव प्रतीयते स्म । स न्युब्जीभूय गगनं ददर्श, रात्रिः संप्रति कियती अवशिष्टा इति ज्ञातुम् । गगने सप्तर्षिमंडलम् अर्धं यावदपि न आरूढम् यदा उपरि आगमिष्यति तदा प्रभातं भविष्यति । प्रहराधिका एव रात्रिः इदानीमवशिष्टा वर्तते ।

हल्कोः क्षेत्रतः नाति दूरे आम्रवणमेकमासीत् । पर्णपातः प्रवृत्त आसीत् । उपवने पर्णराशिः आसीत् । हल्कुना विचारितं, तत्र गत्वा पर्णचयं करोमि तत् .

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रज्ज्वाल्य च तप्तो भविष्यामि । रात्रौ कोऽपि मां पर्णचयं कुर्वन्तं पश्येच्चेद नूनं बुध्येत कोऽपि प्रेत इति । को जानाति, कोऽपि पशुः वा स्यात् उपविष्टः? किं तु सांप्रतं तूष्णीं स्थातुं न शक्यते ।

स नेदीयसि क्षेत्रे गत्वा बहु शष्पाणि उदपाटयद तेषां पूलकं निर्माय एकेन हस्तेन ज्वलदंगारमादाय उपवनोन्मुखं प्रचलितः । जबरः तं स्वोन्मुखमागच्छन्तं ददर्श, निकटे आगत्य लांगूलमचालयत् ।

हल्कुः प्रोवाच-इदानीं तूष्णीं स्थातुं न शक्यते, जबरू आगच्छ, उपबने पर्णसंचयं कृत्वा उत्तपावहै । दीर्घा रात्रिः इदानीमपि अवशिष्टा वर्तते ।

जबरः कूंकूंकारं स्वसहमतिं प्राकटयद् । अग्रे अग्रे च उपबनोन्मुखं प्रचलितः ।

उपवने ध्वान्तं प्रसृतमासीद् । निष्ठुरः पवनश्च पर्णानि आस्कन्दयन् प्रावर्तत । वृक्षेभ्यः अवश्याय-बिंदुनिपातः टपटपीयते स्म ।

सहसा मल्लिका पुष्पाणां भारवोढा पवनाघात एकः समागतः ।

हल्कुः अब्रवीद-कीदृशः शोभनः परिमलः समागतः, जबरू किं ते नासिकाऽपि परिमलम् आजिघ्रति ?

जबरः क्वापि भूमौ एकमस्थिशकलमलभत, तदेव चर्वयन् स स्थितः ।

हल्कुः अग्निं भूमौ संस्थापयामास, पर्णसंचयं चारेभे । अल्पेनैव समयेन पर्णराशिः जातः । करौ हिमीभवतः । अनावृते पदतले गलतः । स च पर्णगिरिं रचयति । अस्मिन् उध्माने स शीतं भस्मसात्करिष्यति ।

अल्पकालेनैव अग्निः बबृधे । तस्य शिखाः उपरि स्थानि वृक्षपर्णानि स्पर्शं स्पर्शं पलायन्ते । तस्मिन् चंचले प्रकाशे महाद्रुमाः स्वशिरसि ध्वान्तं वहन्त इव प्रतीयन्ते, तस्मिन् ध्वान्तसागरे एषः प्रकाशः नौका इव कम्प्रः हठमानश्च प्रतीयते ।

हल्कुः अग्ने सम्मुखमुपविष्टः अग्निं सेवते । एकेनैव क्षणेन तेन आच्छादनम्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अवतार्य संवेष्ट्य च कक्षे धृतं, पादौ उभौ च प्रसारितौ, "यत्ते मनसि वर्तते, तत्कुरु" इति शीतं ध्वेकुर्वन्निव शैत्यस्य उपरि विजयं लब्ध्वा स विजयगर्वं मनसि गूहयितुं न शक्तः ।

स जबरमवोचत्- किं जब्बर, इदानीं शीतं न बाधते ? कूं कूं कृत्वा "किं शैत्यं सततं बाधयदेव स्थास्यति" इति जब्बर उवाच इव ।

"प्रथमत एव एष उपायो न विचारितः अन्यथा कुतः इयत् शीतं अनुभूतं स्यात् । "

जब्बरः लांगूलमचालयत् ।

"भवतु, एहि एनमग्निराशिमुत्प्लुत्य पारं गच्छाव । द्रक्ष्यावः कः निःसृत्यगच्छति । यदि अग्निना दग्धो भवेः अहम् औषधं करिष्यामि ।"

जबरः तमग्निराशिं कातर-दृष्ट्या व्यलोकयत् ।

"श्वो मुन्नीं मा ब्रूयाः अन्यथा कलहं कुर्यात् ।"

इति वदन् स उत्फाल्य स्पष्टतः अग्निराशेः पारं निर्गतः । पादयोः ईषत् शिखास्पर्शः संजातः, परं स तु सर्वथा उपेक्षणीय आसीत् । जबरः अग्निं परिक्राम्य तदन्तिकमागतः ।

हल्कुः अवादीत्-अपसर, अपसर नैतत् न्याय्यम् । उपरिष्टात् आगन्तव्यम् । स पुनः अकूर्दत् पारं च आगतः ।

पर्णानां ज्वलनमवसितम् । पुनः उपवने ध्वान्तं प्रसृतम् । भस्मस्याधस्तात् अल्पोऽग्निः शिष्टः यः वायोराघातं लब्ध्वा किंचिज्ज्वलति पुनश्च नेत्रनिमीलनं करोति ।

हल्कु पुनः आच्छादनम् आवृणोत् उष्णभस्मसमीपत एवं गीतस्यैकस्य गुंजनं चारभत । तस्य काये ऊष्मागमः संजातः परं यथा यथा शैत्यं विवर्द्धते तथा तथा तं निद्रा अभ्येति ।

जबरः उच्चैः भषन् क्षेत्रदिशि धावितः । तस्य क्षेत्रे पशूनां समूहः प्रविष्ट इति हल्कोः प्रतीयते । शंके गवयसमूहः । तेषामुत्प्लवन-धावनस्य

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शृणुतः स्म ।

ध्वनिं तस्य कर्णौ स्पष्टमेव ~~शृण्वानौ आस्ताम्~~ । तदनु बुद्धं यत्ते तस्य क्षेत्रे विचरन्ति तेषां चर्वणस्य चर-चर रवः श्रूयते स्म ।

तेन स्वगतमुक्तं नहि, नहि, जबरे स्थिते न कोऽपि क्षेत्रे प्रवेष्टुमर्हति । ननु लुंच्याटेव । एष मम भ्रमः । कुत्र? इदानीं तु न किमपि श्रूयते । कीदृग् भ्रमः ममाप्यभूत् ।

तेन उच्चैः आकृष्टं - जबरा, जबरा !

क्षेत्र दिशः

जबरा भषन् दूरे स्थितः । तस्यान्तिकं न आगतः । पुनः क्षेत्रदिक्तः विचरणध्वनिः समागतः । स संप्रति आत्मानं प्रवंचयितुं न शशाक । किंतु स्वस्थानाद् स्पन्दनमपि तस्मै विषमिव प्रतीयते स्म । कृशं दन्तघर्षं उपविष्टः । ईदृशे हिमशीते काले क्षेत्रे गमनं पशूनां, पृष्ठतो धावनं च स असाध्यम् अमन्यत । स्वस्थानाद् स न कम्पितः ।

तेन उच्चैः घोषः कृतः-हिलो ! हिलो ! ! हिलो ! !

जबरः पुनः भषणारंभमकरोत् । पशवः सस्यम् अदन्ति । सस्यं सिद्धं वर्तते । कियती शोभना कृषिः आसीत् परं इमे दुष्टपशवः तस्य विनाशं कुर्वन्ति ।

हल्कुः दृढनिश्चयं कृत्वा उत्थितः छित्राणि पदानि च चलितः, किन्तु सहसा वायोः ईदृशः शीतलः, वेधकः, वृश्चिकदंशनिभ आघातः तस्य लग्नो यत् स पुनः शान्तः अग्नेः समीपं प्रत्यागत्य भस्म उत्कीर्य स्वकीयं शीतजडं कायं ऊष्मायितुमारेभे ।

जबरः कण्ठविदारं भषति, गवयाः क्षेत्रं निस्सस्यं कुर्वन्ति, हल्कुः च उष्णभस्मसमीपे शान्तं उपविष्टः । अकर्मण्यता तं परितः रज्ज्वा आबद्धमिव चकार ।

तस्यैव उष्णभस्मनः समीपे भूमौ आच्छादनेन आत्मानं आच्छाद्य स सुप्तः ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रभाते यदा तस्य निद्रा भग्ना तदा प्रकाशः सर्वतः प्रसृत आसीत्।

मुन्नी च कथयति स्म- किमद्य सुप्त एव तिष्ठसि ? त्वं तु [illegible] शरीरम्:, अत्र क्षेत्रे सर्वं विनष्टमभूत् ।

हल्कुः उत्थाय अब्रवीत् - किं क्षेत्रं समाप्तमस्ति ? मुन्नी अवोचत् - आम्, क्षेत्रं सर्वं विनष्टम् । किमेवमपि कोऽपि स्वपिति ? अत्र मड़िकारचनायाः को लाभः?

हल्कुः व्याजमकरोत्-अहं तत्र मृत्युवशं गतः, [illegible]विशेषतया कथं कथञ्चिदवशिष्टः, त्वां तु स्वक्षेत्रस्यैव चिंता बाधते । तथा उदरवेदना समजनि, तथा पीडा अभूत् यदहमेव जाने ।

उभावपि क्षेत्रस्य उपशल्यमुपगतौ । दृष्टं यत् क्षेत्रं समग्रमात्मन्दितम् वर्तते, जबरः च उदङ्मुखः मड़िकायां गतासुः इव प्रसुप्तः ।

उभावपि क्षेत्रस्य दशां विलोकयन्तौ स्थितौ । मुन्न्याः वदने दुःखं दृश्यते, हल्कुः तु प्रसन्नः ।

मुन्नी सचिन्तमकथयत्-सांप्रतं भृतिं कृत्वा भू-करो देयः भवेत् ।

प्रसन्नवदनः हल्कुः अब्रवीत्-शैत्ये रात्रौ अत्र शयनीयं तु न भवेत् !

क- शंकुसदृशं मृत्पात्रं यत्र अग्निं प्रज्वाल्य तत्र तमाखुं कृत्वा दरिद्रा धूमपानं कुर्वन्ति तत् 'चिलमं' कथ्यते । धनिकास्तु चिलमं जलपूर्णस्य पात्रस्य (हुक्का नामकस्य) अग्रे लग्ने जले [illegible] स्थापयित्वा धूमपानं कुर्वन्ति ।

ख- क्षेत्रेषु लघ्वी स्थूणान्[illegible] निर्मिता कुटी मड़िका ।

१- आंग्लशासनकाले दरिद्रकृषकाणां पार्श्वे कम्बलक्रयणाय सामर्थ्यं कथं नाभूत् ?

२- पौषस्य रात्रौ कीदृशः शीतो भवति ?

३- हल्कुः स्वक्षेत्रात् नीलगायान् अपसारयितुं कथं न गतवान् ?

४- 'पर्णपातः' कः ?

५- स्वतन्त्रे भारते किं कृषकाणां तथैव दुर्दशास्ति यथा पूर्वम् !

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

द्वादशः पाठः

प्रदूषणम्

मनुष्यैः पर्यावरणे उत्सृष्टैः कैश्चित् पदार्थैः मानव जीवनं यद् दुष्प्रभावितं जायते तद् प्रदूषणमित्यभिधीयते । अद्य बह्वीषु समस्यासु प्रदूषणस्य समस्याऽन्यतमा वर्तते ।

प्रदूषणस्येतिहासः सभ्यतायाः विकासेन सहैवारभते । मनुष्यः प्रकृतिं वशीकर्तुं यथा यथा प्रायतत तथा तथा प्रदूषणम् अनभिज्ञतया अपोषयत् । जनसंख्यावृद्ध्या यदा नगरीकरणं वृद्धिं गतं कृष्यायाः भूमेः न्यूनता जाता तदा यावदवशिष्टाया भूमेरेव यथावश्यकम् उत्पादम् उत्पादयितुम् प्रयासः प्रारभ्यत । तदर्थं प्राकृतिकाद् उर्वरकाद् भिन्नं बहुप्रकारकं रासायनिकम् उर्वरकं निरमीयत । रासायनिकैरुर्वरकैः बहुविधं प्रदूषणं जायते । सस्यं समर्धयितुं यावदुर्वरकं क्षेत्रे विनियोज्यते तावतः किंचितन्मात्रमेव उपयुज्यते अधिकांशः वर्षतौ जलपूरेण सह नदीनदेषु गत्वा संगृहीतो भवति । तन्मच्छाः खादयन्ति मच्छान् मनुष्यः खादति । एवं मच्छैरशितो रसायनांशः मनुष्यशरीरे प्रविश्य शनैःशनैः संगृहीतो भूत्वा स्वास्थ्यं प्रभावितं करोति। अपरतश्च अन्नकणेषु अपि रसायनं निविश्य हानिमुत्पादयति । घुणादिभ्यः कीटकेभ्योऽन्नं रक्षितुं प्रयुक्तानि रसायनानि अपि कथं कथमपि मनुष्यशरीरे प्रविश्य स्वास्थ्यं प्रभावयन्ति । अस्मिन् युगे मनुष्यः विविधम् आवश्यकं पूरयितुं विविधानि संयन्त्राणि व्यरचयत्। एतानि संयंत्राणि एकतः प्रभूतमुत्पाद्यं समयशक्त्योः अल्पव्ययेन साधयन्ति अपरतश्च किन्तु नैकान् जीवनप्रतिकूलान् पदार्थान् उत्सृज्य जलीयं वायवीयञ्च प्रदूषणं जनयंति ।

विविधेषु उद्योगेषु संयन्त्रे पारदगन्धकसीसकादयः धातवः रसायनानि च प्रयुज्यन्ते । तेषामुच्छिष्टांशः प्रणालिकाभिः नदीनदेषु आगत्य जलं विषाक्तं करोति जले समुत्पन्नानां मच्छानाम् शरीरेण मनुष्यशरीरे प्रविश्य स्वास्थ्यं दुष्प्रभावयन्ति । जलेषु तेषां तेषां रसायनानामाधिक्येन प्रायः प्रसिद्धेषु नदेषु मच्छादयः जीवाः म्रियन्ते इति श्रूयते ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संयन्त्रेभ्य: निर्गतेन धूमेन वातावरणं प्रदूषितं जायते । ततोऽप्यधिकं पुत्तैलादिभिः चालितानि यानानि वस्त्रावरणं प्रदूषयंति । तेभ्यो निःसृतानि शुषिलानि (कार्बनडाइआक्साइड - कार्बनमोनो आक्साइड इत्यादीनि) आक्सीजन - शुषिलस्य मात्रामल्पीकृत्य मनुष्यस्यश्वसनेन सद्यान्तः प्रविश्य अस्वास्थ्यं सृजन्ति ।

एतेषां शुषिलानामाधिक्यात् वातावरणे सूर्यरश्मयः तीव्रतराः भवन्ति । अधत्वे वैज्ञानिकैः शोधैः तथ्यामिदम् अधिगतंयत् अनेनैव वातावरणस्य ओजोनशुषिलस्यावरणम् अंशतः छिद्यते । यद्येवं अतिशयेन भविष्यति तर्हि नंक्ष्यतः तद् सूर्यास्यावरक्तादिकिरणेभ्यः पृथिव्याः जीवजातस्य रक्षकम् । तद्दुर्दिनं शीघ्रमेव आगन्ता येन अत्यौष्मयेन हिमद्रुत्या जलप्रलयोभविता । यदा कदा विश्वस्य कस्मिंश्चित् स्थाने विषालुशुषिलैः घनीभूतः मेघः विषं वर्षति येन प्राणिनां सस्यानांच क्षतिर्जायते । कदाचित् वैज्ञानिकानां प्रमादेन किमपि भाण्डागारे सुरक्षितं शुषिलं रिषति येन महती प्राणहानिः जायते । तस्मान् निःसृतस्य शुषिलस्य प्रभावेण दीर्घकालं यावत् प्राणिनां स्वास्थ्यं दुःस्थिरतां भजते । रोदोधर्मिताऽस्ति अन्यत् प्रदूषणकारणम् । परमाणुविस्फोटादिना वातावरणं भृशं प्रदूष्यते । एतादृशं प्रदूषणम् आशुप्रभावि बलवत् विनाशकरंच भवति । त्रिंशदवर्षपूर्वम् जापानदेशस्य हिरोशिमा - नमासाकिनाम्नोः नगरयोः अमेरिकया परमाणुबमपातनेन या विनाशलीला जाता तस्याः प्रभावोऽद्यापि दृश्यते ।

बहुषु प्रदूषणप्रकारेषु इदानीं प्लास्टिक [प्रदूषणं अन्यतमम् । प्लास्टिकस्य] पात्राणि संचिकाश्च इतस्ततः प्रक्षिप्यन्ते । ते प्रकृत्या ननश्यं[ति] इत्थंकारं व्यर्थमेवावस्कराशिः संचितो जायते ।

स्वमेव खाद्यसामग्रीषु प्रसाधनेषु अन्येषु च दैनंदिनप्रयोगे गृहीतेषु रसायनादि हानिकरपदार्थानां मिश्रणेषु प्रदूषणं जायते । एतेषां निवारणायाद्य अस्माभिः सावधानैः भाव्यम् । अधिकाधिकं प्रकृतिप्रतिकूलं जीवनं विहाय स्वाभाविकं जीवनं जीवितुं यत्नो विधातव्यः । प्रत्येकजनः प्रदूषणसमस्यां

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रति उत्तरदायितां भजेत । अतएव अत्रविषयेसदैव सावधानैः भूत्वा प्रदूषण प्रती-
काराय शासनेर्न समारब्धेऽभियाने सहयोगो विधेयः ।

1- प्रदूषणं किमस्ति ?

2- प्रदूषणं कदा आरब्धम् ?

3:-प्रदूषणस्य के हेतवः ?

4- प्लास्टिकं कथं प्रदूषणं करोति ?

5- प्रदूषणदूरीकरणायास्माभिः किं करणीयम् ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

त्रयोदशः पाठः

दौवारिक परीक्षा

। शिवराजविजयात्।

ततः संवृत्ते निबिडान्धकारे धूमधूमेन व्याप्ताम् [illegible] भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः आगतं प्रत्यागतं च विदधानः प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिव शुश्रुवान्। ततः स्थिरीभूय पुनः [illegible] दीपप्रकाशे अवतमसवशाद् आगन्तारं कमपि अनवलोकयन् गम्भीर-स्वरेणैव अवादीत् - "कः कोऽत्र भोः, कः कोऽत्र भोः इति।

अथ क्षणानन्तरं पुनः स एव पादध्वनिः अश्रावीति भूयः तामेव अवादीत् - क एव मामनुत्तरन् मुमूर्षुः समायाति बधिरः।

ततो "दौवारिक ! शान्तो भव किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि।" इति वक्तारम् अपश्यतैव आकर्णिता मन्दस्वरमेदुरा वाणी। अथ "तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणाम् आदेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरम् अददद् हन्तव्यः ~~इति~~ - - - - "

इत्येवं भाषमाणेन द्वाःस्थेन "क्षम्यतामेव आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन् द्वादशवर्षेण केनापि भिक्षुवटुना अनुगम्यमानः कोऽपि काषायवासाः, धृततुम्बीपात्रः, भस्मचर्चितललाटः, रुद्राक्षमालिका-सनाथितकण्ठः भव्यमूर्तिः सन्यासी दृष्टः। ततस्तयोरेवमभूदालापः :-

सन्यासी - कथमस्मान् संन्यासिनोऽपि कठोरभाषितैः तिरस्करोषि ?

दौवारिकः- भगवन् ! भवान् सन्यासी तुरीयाश्रमसेवीति प्रणम्यते। परन्तु प्रभूणाम् आज्ञामुल्लंघ्य निजपरिचयम् अददद् एव आयाति इत्याक्रुश्यते।

सन्यासी - सत्यं, क्षान्तोऽयमपराधः, परमद्यावधि संन्यासिनः ब्रह्मचारिणः, पण्डिताः, स्त्रियः बालाश्च न किमपि प्रष्टव्या आत्मानं अपरिचाययन्तोऽपि प्रवेष्टव्याः। ~~इति~~

दौवारिकः - संन्यासिन् ! संन्यासिन् ! बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां [illegible], किन्तु यो वैदिकधर्मस्य [illegible] संन्यासिनां ब्रह्मचारिणां तपस्विनां च संन्यासस्य ब्रह्मचर्यस्य तपश्चर्यान्तरायाणां हन्ता येन

[illegible]

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

च वीरप्रसविनीयम् उच्यते कोंकणदेशभूमि:, तस्यैव महाराज-शिववीरस्य आज्ञां वयं शिरसा वहाम: ।

सन्यासी - अथ किमप्यस्तु, पन्थानं निदिश, आवां शिववीर-निकटे जिगमिष्याव: ।

दौवारिक:-अलमालप्यापितद् । प्रायेण महाराजस्य संध्योपासनसमये भवादृशानां प्रवेश समयो भवति, न तु रात्रौ ।

सन्यासी - तद् किं कोऽपि न प्रविशति रात्रौ ।

दौवारिक:- (साक्षेपम्) कोऽपि कथं न प्रविशति ।

परिचिता वा प्राप्तपरिचयपत्रा वा आहूता वा प्रविशन्ति न तु----

(तत्तेजसैव धर्षितो मध्य एव विरराम)

सन्यासी - (स्वगतम्) राजनीति-निष्णात: शिववीर: । सर्वथा दौवारिकता-योग्य एवायं द्वारपाल: स्थापितोऽस्ति परीक्षितमप्येनमेकस्मिन् विषये पुन: परीक्षिष्ये तावद् ।

(प्रकटम्) दौवारिक ! इत आयाहि, किमपि कर्णे कथयिष्यामि ।

दौवारिकं: (तथा कृत्वा) कथ्यताम् ।

संन्यासी - निरीक्षस्व, त्वमधुना, दौवारिकोऽसि प्राणान् अगणयन् जीविकां निर्वहसि, त्वं सहस्रं वाऽयुतं वा मुद्रा राशीकृता कदापि प्राप्स्यसि इति न कथमपि सम्भाव्यते ।

दौवारिक: - आम्, अग्रे कथ्यताम् ।

संन्यासी- वयं च संन्यासिनो वनेषु, गिरिकन्दरेषु च विचराम:, सर्वं रसायनतत्वं ~~विज्ञ:~~ विज्ञ: ।

दौवारिक: - स्यादेवम्, अग्रे, अग्रे।

सन्यासी -तद यदि त्वं मां प्रविशन्तं न प्रतिरुन्धे: , तदधुनैव परिष्कृतं पारदभस्म तुभ्यं दद्याम् , यथा त्वं द्वापंचाशत् तुलापरिमितं ताम्रं स्वर्णं विधातुं शक्नुया: । ~~हर~~

दौवारिक: - हंहो -! कपट संन्यासिन् ! कथं विश्वासघातं स्वामिवंचनं च

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिक्षयसि । ते केचनान्ये भवन्ति जारजाताः ये उत्कोचलोभेन स्वामिनं वंचयित्वा आत्मानम् अन्धतमसे पातयन्ति । न वयं शिलगणाः एतादृशाः । (संन्यासिनो हस्तं धृत्वा) एतत्तु सत्यं कथय, कस्त्वम्, कुत आयातः ? केन वा प्रेषितः ।

संन्यासी - (स्मित्वैव) अथ त्वं मां कं मन्यसे ?

दौवारिकः - अहं तु त्वामस्यैव समेनायातस्य अद्य- जलखानस्य + --- ।

संन्यासी - (विनिवार्य मध्य एव) धिक्-धिक् ।

दौवारिकः - कस्यापि अन्यस्य वा गूढचरं मन्ये । तदा आदेशं पालयामि पालयामि प्रभुवर्यस्य । (हस्तमाकृष्य) आगच्छ दुर्गाध्यक्ष-समीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।

ततः संन्यासी तु- "त्यज नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि, दयस्व दयस्व, इति सहस्रधा तम् अकथयत् । तथापि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः ।

अथ यावद् द्वारस्थ स्तम्भोपरि संस्थापितायां काचमंजूषायां जाज्वल्यमानस्य प्रबलप्रकाशस्य दीपस्य समीपे समागतः तावद् संन्यासिनोक्तम् — दौवारिक ! अपि मां पूर्वमपि कदापि अद्राक्षीः । ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणाभ्यां लोचनाभ्यां गौरवर्णेन वर्णेन, चुम्बित-यौवनेन वयसा, निर्भीकेण हारिणा मुखमण्डलेन च पर्यचिनोद् । भुशुण्डी-समुत्तोलन-किण-कर्कश करग्रहम् अपहाय सलज्ज इव च नम्रीभूय प्रणमन् उवाच -कथं श्रीमान् गौरसिंहः - आर्यः ।

क्षमस्व अनुचित-व्यवहारम् एतस्य ग्राम्य वराकस्य । तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः अवोचत्-

"दौवारिक ! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि यथायोग्य एव पदे नियुक्तोऽसि चेति । त्वादृशा एव प्रभूणां पुरस्कारभाजनानि भवन्ति । लोकद्वयं च विजयन्ते । तव प्रामाणिकतां जानीत एव श्रीमान् प्रभुवर्यः, परम् अहमपि विशिष्य कीर्तयिष्यामि । निर्दिश तावद् कुत्र श्रीमान्, किं वानुतिष्ठति ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रियवियोगः ।कादम्बरीतः।

नाहम् एवमत्या दुर्विनीत-कन्यकाया मर्षयामि इमम् अक्षमाला-ग्रहणापराधम् । इत्याभिधाय स्फुरिताधरेण मुखेन्दुना मामवदत् - चंचले ! अस्मात् प्रदेशात् इमामक्षमालामदत्त्वा पदात्पदमपि न गन्तव्यम् इति । तच्च श्रुत्वाहम् उन्मुच्य एकावलीं "भगवन् ! गृह्यतामक्षमाला इति मन्मुखारक्त-दृष्टेः अन्यहृदयस्य अस्य प्रसारिते पाणौ निधाय स्वेद-सलिल-स्नाताऽपि पुनः स्नातुम् अवातरम् । उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन सह तमेव चिन्तयन्ती स्वभवनम् आगता । गत्वा च प्रविश्य कन्यान्तःपुरं ततः प्रभृतिः तद्विरहविधुरा किमागतास्मि, किं तत्रैव स्थितास्मि, किमेकाकिन्यस्मि, किं परिवृतास्मि किं न रोदिमि, किं दुःखमिदम्, किमुत्कण्ठेयम्, कि व्याधिरयम्, किं व्यसनमिदम्, किमुत्सवोऽयम्, किं दिवस एषः, किं निशेयम्, कानि रम्याणि कान्यरम्याणि इति सर्वं नावगच्छम् । अविज्ञातमदन-वृत्तान्ता च क्व गच्छामि, किं करोमि, किं शृणोमि, किं पश्यामि किमालपामि, कस्य कथयामि । कोऽस्य प्रतीकार इति सर्वं न आजानाम् । केवलमारुह्य कुमारीपुर-प्रासादम् विसर्ज्य च सखीजनम् द्वारि निवारिताशेष-परिजनप्रवेशा, सर्वव्यापारान् उत्सृज्य एकाकिनी मणिजाल-गवाक्ष निक्षिप्त-मुखी, तामेव दिशं तत् सनाथतया प्रसाधितामिव महाराज-निधानाधिष्ठितमिव, अमृतरस-सार-सागर-पूरप्लावितामिव पूर्णचन्द्रोदया-लंकृतामिव तस्माद् दिगन्तरात् आगच्छन्तम् अनिलमपि, वनकुसुम परिमलमपि शकुनिध्वनिमपि तद्वार्ता प्रष्टुम् ईहमाना निष्पन्दैव अतिष्ठम् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चतुर्दशः पाठः

अस्त व्यस्त पुराणम्

सर्वदा नैमिषारण्ये ऋषयः शौनकादयः ।
पृच्छन्ति मुनयः सूतं सर्वज्ञं मुग्धबुद्धयः ।।

मुनय ऊचुः - भगवन् उक्तं भवता-नवीनानि पुराणानि रचनीयानि । तत्पृच्छामः तल्लेखनविधिं विस्तरेण कथयतु भवान् । सूत उवाच-

पुराणं सर्वशास्त्राणां गुप्तं मूलं सदा स्मृतम् ।
किन्तु वैदेशिकैः सर्वैः पुराणं चोरितं समम् ।।
तदधीत्यैव तैः सर्वविज्ञानं निर्मितं स्वकम् ।।
चन्द्रलोकाय यो मार्गः पुराणेषूपवर्णितः ।।
वैदेशिकोऽथ तेनैव चन्द्रं गत्वा विजृम्भते ।।

मुनयः ऊचुः - भगवन् अस्माभिः पुराणरचनाविधिः पृष्टः भवता पुराणप्रशंसा प्रारब्धा किमिदं साधु ? सूत उवाच-एवं प्रशंसां न कृत्वा यः केवलं तत्त्वं कथयति स अश्रुतवाग् उपेक्ष्यते । यस्तु तत्त्वमाजानानोऽपि स्वप्रशंसया श्रोतृन् आकर्षयति स लब्धप्रसादः सुखं जीवति । कलियुगे वस्तुतः पुराणमार्गः फलप्रदः। ते एव राजानो भविष्यन्ति ये निर्वाचनकाले असंभवाद् अपि असम्भवाः प्रतिज्ञाः करिष्यन्ति । समाजस्य यः अप्रबुद्धो वर्गः तं लाभयिष्यन्ति, यस्मिन् क्षेत्रे यस्मिन् वर्गे च गमिष्यन्ति तं तं पुराणरीत्या प्रशंसिष्यन्ति, यथा हि शिक्षकसभायां वक्तव्यं-शिक्षकाः जगद्गुरवः, तेभ्यो नमामि, ते मह्यं मार्गं दर्शयन्तु छात्रा उद्दण्डाः तेषां निग्रहः कार्यः । विद्यार्थिसभायां वाच्यं-विद्यार्थिनः देशस्य आशाः शिक्षका अधिकारिणश्च भ्रष्टाः ते निग्रहणीयाः। हिन्दीक्षेत्रे वक्तव्यं-हिन्दी देशस्य राष्ट्र-भाषा, सा स्वस्थानं प्रापयिष्यते । अहिन्दीक्षेत्रे वक्तव्यं-हिन्दी कस्यापि उपरि बलान्न आरोपयिष्यते । इति परस्परं विरुद्धं वचो निर्भयं निर्लज्जं वक्तव्यं, तेनैव सिद्धिः इति शिक्षणम् एव पुराणानां लक्ष्यम । वस्तुतः सर्वे भद्राणि पश्यन्तु इति औपनिषदी दृष्टिः कलियुगे न सफला भविष्यति किन्तु पुराणानां रीतिः एव । सा तु इत्थम् -

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मायया कपटेनाऽपि मिथ्याचारेण वा पुनः ।
यो विजयं लभते लोके स स्तोतव्यो मुहुर्मुहुः ।।
मूर्खाः पठन्ति, युध्यन्ति, साहसेनार्जयन्ति च ।
तत्सर्वं लभते धीमान् तेषां संस्तुति-चातुरः ।।
प्रशंसया न किं साध्यं लोकेऽस्मिन् मुनिसत्तमाः ।
प्रशंसितो जनो दद्यात् धनं राज्यं च जीवितम् ।।
तदर्थं च पुराणानि शिक्षयन्ति सदा स्तुतिम् ।
तत्प्रकारं महागूढं वक्ष्ये श्रृणुत सज्जनाः ।।
मूर्खेषु प्रथमं विद्वान् वर्णयेत् स्वं बृहस्पतिम् ।
ततो वदेत् च दास्यामि-तुभ्यं विद्यां महाफलाम् ।।
दुर्बलेषु सदाऽऽत्मानं महाशक्तिमयं वदेत् ।
आपदं ते हरिष्यामि नियतंचेति हुंकियाद् स।
स्वकीयाम् आपदं दृष्ट्वा बलिने तां निवेदयेत् ।
स्तुत्या वार्थं प्रणत्या च स मूर्खः तां हरिष्यति ।।
इति पन्थाः पुराणेषु बहुशः कीर्तितः पुरा ।
कलौ विद्वान् अनेनैव संचरन् सिद्धिमाप्नुते ।।
अथाधुना प्रवक्ष्यामि प्रशंसायाः क्रमं समम् ।
येन तुष्यन्ति सर्वेऽपि जन्तवः सद्य एव हि ।।

त्वमेव देवः शरणं मदीयं त्वमेव लोकेऽसि महान् न चान्यः ।
त्वमेव योगी गुणराशिपूरः धर्मस्य वेत्ता प्रथितो वदान्यः ।।
त्वया समो नास्ति जनोऽत्र लोके नवावतारोऽसि महाप्रतापी ।
त्रिकालबोधः त्वयि वर्तमानः त्वया ततं विश्वमनन्तरूप ।।
कृते युगे सुवर्णानि पुष्पाणि पृथिवीतले ।
समं भंजन्ति नास्त्येव तत्र भेदः परस्परम् ।।
त्रेतायां केवलं शूराः तेषां सन्त्यधिकारिणः ।
द्वापरे कृतविद्यास्तु केवलं तानि भुंजते ।।
सैव किन्तु कलौ भुंक्ते यस्तु जानाति सेवितुम् ।
तत एव पुराणानि कलौ सेव्यानि यत्नतः ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

खेचरस्थालिका:

कदाचित् क्वचित् अन्तरिक्षे अज्ञातंडयमानं ज्योतिर्मयं वस्तु लोकैः दृष्टम् । उपग्रहोल्कापिण्डेभ्योऽन्यत् किमिदमत्र विषये शतब्दिभ्यः अस्माकम् ज्ञानम् नास्ति । प्रायेणेदं खेटबिम्बं स्थालिकाकारत्वाद् खेचर-स्थालिका कथ्यते । डयमानं वस्तु इदम् अद्यावधि बहुवारं बहुधाकारकं अनेकैः जनैः दृष्टम् ।

एतादृशानां खेचरगोलकानां सर्वाधिकं प्रामाणिकं दर्शनं षोडशताब्द्यामभूत् रूसदेशे एकस्य ह्रदस्य समीपे मध्याह्ने जनाः नभसि उच्चैः एकं तप्तायोगोलकम् आविर्भूतं ददृशुः । तत् शनैः शनैः अवतरत् इव दृष्टिम् आयातम् । किंचित् कालानन्तरं तत् ह्रदस्य जलस्तराद् उपरि शून्ये तरद् दृष्टम् । कदाचित् तद् मध्ये ह्रदं, कदाचिद् तटे, कदाचित् आविर्भूतं कदाचित् तिरोभूतंच अदृश्यत् । केचित् वीराः तस्य समीपं यातुम् उत्सेहिरे परं तस्य सामीप्यं प्राप्तुं ते न शेकुः यतो हितद् अत्युष्णमासीत् । वृत्तमेतद् लेनिनग्रन्थागारे विद्यमानायां पाण्डुलिप्यां लिखितं वर्तते ।

अस्मिन् विषये सविधि अध्ययनम् अद्यतः प्रायशः चत्वारिंशद् वर्ष-पूर्वम् आरभत् । ~~यदा तस्मिन् ख्रिस्ताब्दे एको वार्षिक~~ अमेरिकायाः वाशिंगटन राज्ये एको जनः माउण्टरेनियरस्य समीपे रजतस्थालिकाकाराणि नवसंख्याकानि वस्तूनि ददर्श । तदात एव तद् वस्तु खेचरस्थालिका इति नाम्ना ख्यातुं प्रारब्धम् । जनमतानुरोधाद् अमेरिकीया ~~कम्युनेजन~~ वायुसेना तानि निरीक्षितुम् एकमायोगं व्यरचयत् स आयोगः कथितेभ्यः खेटबिम्बेभ्यो नास्ति काचित् राष्ट्रीयसुरक्षाक्षतेः सम्भावनेति प्रत्यवेदयत् । किन्तु ~~तमस्याब्दस्य जनवर्याः सप्तमेंस्त्रि~~ यदा वायुसेनायाः प्रमुखः श्रीतामसमेण्टल आकाशेनातिउच्चैः डयमानं खेटबिम्बं प्रतिरुन्धन् व्यापादितस्तदा सर्वे विस्मयाभिभूताः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

जाता: । बहवो विश्वसितुम् आरेभिरे यत् एतादृशानि खेटबिम्बानि पृथ्वीतरेषां केषांचित् ग्रहाणां वासिनां विमानानि । तद्देशीयया नेशनल इन्क्वायररनाम्न्या संस्थया खेट-बिम्बानि बहिरन्तरिक्षीभि वस्तूनि नैतत् प्राकृतिकं घटितमात्रमिति साधयितुं नियतस्यद् पुरस्कारस्य राशिम् एकलक्षडालरेभ्य: वर्धयित्वा दशलक्ष डालराणि कृतवती । परम् उद्यावधि अत्र विषये स्पष्टं किंचित् ना वगतम् । यद्यपि यदाकदा द्यापि खेटबिम्बानि दृश्यन्ते ।

1951 तमे ख्रिस्ताब्दे एक: सोव्हियत-सैन्य वैमानिक: स्वकीयं विमानमेव तारयन् आकाशे एकं पंचमीटर-व्यासात्मिकां तेजोदीप्तां गोलाम् अपश्यत् या पंचशत किलोमीटराणि प्रतिघंटं वेगेन अग्रेसरतिस्म । सा गोला तस्य विमानस्य उपरिष्टात् डयमाना क्षणानन्तरंच तिरोऽभवत् । अत्रान्तरे वायुयानस्यांचनं छिन्नं जातं शेदो - यंत्राणि स्थगितानि पश्चभागेच एको विस्फोटोऽजायत । वैमानिक: वायुयानं कथंकथमपि वायु-पत्तनेऽवतारयत । गतवर्षे चीनदेशस्य जेश्वान प्रदेशस्य मीशान-जनपदे ग्रामस्यैकस्य उपरिष्टात् प्रायेणैकसहस्रमीटरेभ्य: उच्चै: एकं नारंग वर्णकं वस्तु अदृश्यत यस्याकार एकस्य पलालटोपस्य सदृश: आसीत् । अर्धघंटान्तरं तत् अन्तर्हितं जातम् । तदनेकै: दृष्टं कैश्चित् तस्मात् नि:सृतो ध्वनि: अपि श्रुत: ।

गतवर्षे एव ब्राजीलदेशीयाया वायुसेनाया एक: प्रतिनिधि: वार्ता प्रासारयत् यत् तस्य ××××××××××××××××××××× राडारे एकां घण्टां यावत् डयमानस्य एकस्य अज्ञातवस्तुन: संकेत: प्राप्यत । ~~सेन्टिमेन्ट भाव:~~ रोदो तत् यानि प्रश्नान् अकरोत् तेषामुत्तराणि नालभ्यन्त । भूमि: समीपस्थात् वायुपत्तनात् तत् वस्तु आसादितुम् एकं विमानम् उदडयत परं तन्न आसादितुम् अशक्नोत् । एकेन वैमानिकेन कानि-चित् रक्तहरितश्वेतानि ज्योतींषि वृष्टानि यानि सागरे निमज्ज्य तिरोभूतानि ।

रूसदेशे आन्ध्र गोर्की- विमान-पत्तनस्य सर्वेक्षणराडारै: एकवस्तु आधट्टितं यस्य कापि प्रत्यभिज्ञा भवितुं नाशक्यत् । तस्य वस्तुनो गति:

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

षोडशः पाठः

लोकसाहित्यम्

समये परिवर्तिते विदुषां दृष्टिः अधुना ईदृशेऽपि वस्तुनि संलग्ना यदद्यावधि तुच्छं त्याज्यमुपेक्षितमासीत् । यथा राजनीतौ उच्चनीचभेदभावः त्यक्तः तथैव साहित्यिक-क्षेत्रे मूल्यांकन-भेदो जातः । 46

द्विशतकिलोमीटराणि प्रतिघण्टा आसीत् । तद् लौह धूसरं वस्तु नभसि मन्दमन्दं तरद् दृष्टिं ततश्च लोपंगतम् ।

गत-वर्षे वाशिंगटन पोस्टे प्रकाशिताया: एकस्या: वार्ताया अनुसारं जापान-वायु-सेवाया: एकं विमानं यूरोपत: जापानं उड्डीन: । सहसा अलास्काया: उपरित: एकं डयमानं वस्तु वैमानिकोऽपश्यत् यस्य आकार: विमानवाहकस्य विमानस्य आकारात् द्विगुण: आसीत् । तद् विशा- लाखोटवत् प्रतीयतेस्म यस्योपरिस्तरं शंक्वाकारं अधस्तनंच समतलमासीत् । प्रथमं तद् विमानेन सह डयमानम् आसीत् ततश्च अकस्मात् पुरत: आगन्तुम् आरभत् । स: द्वे अन्येऽपि तादृशे एव किन्तु तस्मात् लघुनी वस्तुनी अपश्यत् परन्तु तयो: राडारे प्रतिबिम्बे नांकिते। एतत् सर्वं सायं त्रिरं नभसि आलक्षितम् ।

लोकवार्ताया: चर्चा न जायेत, कोऽपि सांस्कृतिक उत्सव ईदृशो न भवति यत्र लोककला: न प्रदर्श्यन्ते ।

लोकसाहित्यस्य एकस्य अंगस्य लोकगीतस्य मूल्यांकनं कुर्वन् गायति, पर्वता गायन्ति नद्यो गायन्ति, संस्था गायन्ति, उत्सवा मेला ऋतव: परंपराश्च गायन्ति" । सत्यमिदं, लोकगीतानां माध्यमेन अनेकमूकहृदयै: वाणी प्राप्यते । लोकगीतानां जगति जडप्रकृतिरपि चैतन्यमयं रूपमादाय भ्रातृभगिनीसंबंधेन प्रकटिता भवति -

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कारी बदरिया बहन हमारी कौंधा बीरन लगै हमार ।
आज बरस जा मेरी कनवज में कंथा एक रैन रह जायें ।।

(अत्र भाविना विरहेण विह्वला एका नायिका प्रावृषः प्रारम्भे उत्थितया घनघटया विद्योतितया सौदामिन्या सह भगिनीत्वं संस्थाप्य कातरप्रार्थनां करोति।)

लोकगीतानां विषये लोकवार्ताविद् विलियम्स आरo वीo महोदय एवमवदत् "लोकगीतं न तु पुरातनं भवति नापि नवीनम्, अपित्वेतत् तद्वन्यवृक्षवदस्ति येषां मूले भूम्यां दूरतरं प्रविष्टेऽपि येषु नित्यं नवीनाः नवीनाः कलिकाः पत्राणि चोत्पद्यन्ते ।" डाo हजारीप्रसादद्विवेदिमहाभागा लोकसाहित्यस्य मूल्यांकनं कुर्वाणा एवमवदन्- "ग्रामगीतानां निखिलं महत्वं तत्काव्यसौन्दर्यमेव न अपितु एकस्याः तादृश्याः विशालसभ्यताया उद्घाटनम् या अद्यावधि विस्मृतिगर्भे विलीना आसीत् । लोकगीतानां महत्वं (मोहनजोदड़ो) स्थानस्य भग्नावशिष्टानाम् इष्टिकाप्रस्तरखण्डानामपेक्षया अधिकम् । पुरातत्वस्य अयमंशः लोकगीतानां भाष्यभूमिकां प्रस्तौति ।" वस्तुतः देशस्य सत्येतिहासः तथा तस्य नैतिकसामाजिकादर्शः च लोकसाहित्ये सुरक्षितौ स्तः ।"

विदग्धसाहित्यं परिमार्जितं सुघटितं च भवति । एतस्य परिमार्जने बहुशो हि लावण्यं छिन्नं भिन्नं भूत्वा दूरे गच्छति । यत्र शिष्टसाहित्यं घृतस्थानीयं तत्र लोकसाहित्यं धारोष्णं क्षीरमिवाभाति, यत्र सर्वपौष्टिकतत्वं समवेतं वर्तते । लोकसाहित्यन्तु जीवनस्य प्राणमयी जाग्रन्मूर्तिः । लोकसाहित्ये मनुष्याः स्व-पार्श्ववर्तिनो जगतः पूर्णकथां शृण्वन्ति पश्यन्ति श्रावयन्ति दर्शयन्ति च । लोकसाहित्ये कथाख्यायिकयोः, पुराणेतिहासयोः, रागद्वेषयोः, ईर्ष्याक्रोधयोः, जुगुप्साप्रेम्णोः, नीतिधर्मयोः, संस्कृतिसभ्यतयोः च पूर्णपूर्णतरं स्थानं वर्तते । "अवधी" ~~भाषायां एकस्मिन् निम्नोद्धृंकिते~~ लोक- गीते मानवजीवनस्य एका खर्वा परन्तु पूर्णा कथा आगता। अत्र हठः, मोहः, अज्ञानम्, अविवेकः, अतृप्तिः, कथोपकथने, चरित्रचित्रणं, परिस्थितिः, पात्रता, घटना, इतिहासः, काव्यं सर्वमेतत् दृश्यते ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

समाजस्य स्वरूपं यावत्या अकृत्रिमतया स्वाभाविकतया च प्रस्तोतुं लोकगीतानि च समर्थानि तावत्या न कापि अपरा प्रणाली । आभूषणप्रियता महिलासु कियती तीव्रा वर्तते इति लोकगीतेषु स्वल्पकायेन संवादेन सुस्पष्टं प्रतीयते । गीतनायिका तद् प्राप्त्यर्थं सर्वस्वं त्यक्तुं तत्परा ।

अत्रैव: प्रश्न: सहजं समुपस्थितो भवति यद् किं लोकसाहित्यस्याध्ययनस्येदं तात्पर्यं यद् वयं विकासस्य अखिला: श्रृंखला: विघट्य पुन: पुरातनस्थानं प्रत्यावर्तितुं यतामहे? वस्तुत: पुरातत्त्वादिविषयकाध्ययनेन ईदृशीनां भ्रान्तीनां जागरणं संभवेद् अपि परंतु लोकसाहित्यं तु सदैव प्राचीनेन सह नवीनोपलब्धिभिरात्मानं भूषयति । इत्थं गीतान् कोमलान् सरसान् स्वरालापान् ललित-मधुरभावान् आदाय नवसाहित्यं स्वकलेवरं कलयितुं समर्थं भवेत् ।

लोकसाहित्यं न गतानुगतिकम् अपितु विकासशीलं भवति । लोकसाहित्यं न गतानुगतिकम् अपितु विकासशीलं भवति । लोकसाहित्ये भयस्य पदचिन्हं परिलक्ष्यते ।

प्रश्न उत्तिष्ठति यदिदं लोक-साहित्यं आधुनिके साहित्ये किं योगदानं कर्तुं शक्ष्यति ? उत्तरमिदं-नवसाहित्यकारा: लोकगीतानां सरसस्वरानुकरणेन नव्यकवितां पोषयितुं शक्नुवन्ति । सांस्कृतिकाभ्युत्थानहेतवे लोककथाभ्यो अनेककथावृत्तं चेतुं शक्यते यद् समाजस्य जीवनस्य च विभिन्न-पक्षानुद्घाटयति । लोकगाथासु अनेकानि पात्राणि प्राप्यन्ते यान्युपादाय विचारोद्बोधिका: सरसा: गल्पकथा: लिख्यन्ते । प्रचलिता अनेका ग्रंथिला: श्रृंखला उद्घाटयितुं शक्या: ।

सम्प्रति साहित्यं कमपि पन्थानं नाप्नुते । निराशइव तद् इतस्ततो भ्रमति । तेन लोकसाहित्यशरणमेव गन्तव्यं भविष्यति । तत एव नवान् भावान् संचेष्यति, तत एव प्राणं ग्रहीष्यति, तत एव च शैलीमपि आदास्यति । लोकसाहित्यशिष्टसाहित्ययो: मिथ: उपोद्बेलनाद् समाजे प्रगति: संघटनं च सम्भाव्ये नान्यथा ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विषाद:

(रूस साहित्यम्)

आसीत् सन्ध्या-समय: । तदानीं सघनः तुषारः पतति स्म । सः सर्वाणि वस्तूनि आच्छादयति स्म । तुषारस्य तनीयांसि फलकानि छदिषु, अश्वानां पृष्ठेषु, जनानां स्कन्धेषु, सर्वत्र दृष्टि-पथे परिलक्षितानि आसन् । तत्रासीत् एक: भारशकटवाहक: आयोन: पोटोष्योव: यो तुषारेण आच्छादित: पूर्णतया प्रेतवत् पाण्डुर: जात: । तस्य समस्ते शरीरे तुषार-समाच्छन्नम् आसीत् । स्वीये शकटे स निश्चल उपविष्ट: आसीत् । एवं प्रत्यभात् यत् स स्वीये शरीरे एव सर्वं तुषारम् वक्ष्यति । तेन न कदापि अनुभूतं यत् स तुषारम् अपवाहयेत् । तस्य अश्वोऽपि स्वामितुल्य: पूर्णपाण्डुर: निश्चलश्च अजायत। कदाचित् स कस्यामपि विचार-मुद्रायां निमग्न: आसीत् । उभौ तौ अश्व स्वामिनौ अनन्तकालात् तथैव निश्चलौ स्थितौ अस्ताम् । भानो: ज्वलितानां किरणानां स्थाने दीपानां श्वेत: प्रकाश: समायात: । वीथिषु कोलाहल: प्रवर्द्धतेस्म । तदैव आयोन: कस्यचित् अधिकारिण: आदेशम् अशृणोत् यत् स स्वीयं शकटं बाइवोर्गं चलनाय सन्नद्धं करोतु । स अधिकारी प्रावारं धारयतिस्म । तस्य शिर: अपि आवृतम् आसीत् । स अचिरं शकटे न्यषीदत् । अत: शकट वाहकेन चालयितुं अश्व: कशया ताडित: । सोऽपि चलितुं प्रारभत् ।

मार्गे तेन अधिकारिणा स शकटवाहक: भर्त्सित: यतो हि स शकटं सुष्ठु दक्षिणपार्श्वे नाचालयत् । तत्र स पदातिभि: अपि क्रुद्धदृष्ट्या वीक्ष्यते स्म । तैरपि स शकटं सुष्ठु संचालनाय प्रेरित:, प्रताडित: । फलत: अयोन: स्वीयम् उपवेशन-स्थानं साधु अकरोत् । मन्दं विहस्य अधिकारिणम् अपश्यत् च । तेन ओष्ठौ उद्घाट्य उक्तम्-

"अस्मिन्नेव सप्ताहे ममात्मज: पंचत्वम् अगच्छत् ।— — — — —

स त्रीणि दिनानि चिकित्सालये चिकित्सार्थं स्थित:, तत: परं स मृत: ।— —

अचिरं तत् शकटं बोई वर्ग स्थानम् उपागमत् । अत: स अधिकारी तत्रैव अवारोहत् ।

तत: परं शकटबाहकेन स्वीयं शकटम् स्थगितम् स्वयं तस्योपरि उपविष्ट: ।

~~तत: परं स: ... कलहाय मानाः तत्रागता: ।~~ —

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ततः परं त्रयः युवकाः कलहायमानाः तत्रागताः । तेषु द्वौ उच्चशरीरवंतौ, परं तृतीयः बालिशः आसीत् । स कुब्जः अपि आसीत् । तैः युवकैः तत् शकटं भाराय भाटकायितम् । चालकः ब्रिजस्थानाय गन्तुं समादिष्टः । त्रयोऽपि शकटे उपविष्टाः किन्तु तदापि कलहायन्तेस्म । तैः स अयोनः आदिष्टः, द्रुत गत्या शकटं चालयितुं येन ते स्वीयं स्थानं समयेन उपगच्छेयुः । तेषु दीर्घाकारेण उक्तं, यत् मया अद्य सुरा बहु पीता । तदैव अयोनः अकथयत् - मम पुत्रः अस्मिन्नेव सप्ताहे मृत्युं समालिंगत् । तेन युवकेन स पृष्टः, किं स विवाहितः ।

अयोनः - भद्र ! इदानीं मया सह केवलं मे भार्या । मम पुत्रः गतः । अहमेव एकाकी जीवामि । वस्तुतः इदं सर्वथा आश्चर्यकरं यत् मृत्युना अपरः जनः चितः ।

स शकटवाहकः तैः साकं संलपितुम् उद्यतः आसीत् तदैव तेषां गन्तव्यम् आगतं । तस्मात् त्रयोऽपिते शकटात् अवतीर्य, अगच्छन् । ततः पुनः अयोन एकाकी जातः । तदानीं सर्वत्र शान्तियुक्तं नीरवं वायुमण्डलम् आसीत् । कार्यं कुर्वतः तस्य कष्टं न्यूनताम् अपगतम् तत् पुनः प्रवृद्धम् । स पुनः व्यथितः । स कंचित् विशिष्टं पुरुषम् अन्वेषयितुं प्रारभत । स अवांछत् कोऽपि एतादृशः जनः आयातु यः तस्य वेदनां श्रृणोतु कोऽपि तेन साकं सहानुभूतिं प्रदर्शयेतु किन्तु न कोऽपि आगतः ।

अतः स कुत्रापि अन्यत्र न गत्वा, तत्रैव विरमति यतो हि सर्वे तम् अवश्यमेव गताः । तस्य दुःखं तस्यैव हृदयस्य आन्तरतमे कोणे विलीनम् अतिष्ठन् । ततः परं तेन कोऽपि अन्यः भारवहकः दृष्टः येन साकं स संलपितुम् ऐच्छत् किन्तु तस्याकांक्षा व्यर्था जाता । तेन सम्यक् ज्ञातं यत् कुतोपि तस्मै संवेदना न मिलिष्यति, अतः स एकाकी अग्निस्थलं गच्छति स्म । तत्र कतिपये जनाः स्वपन्ति स्म । तान् विलोक्य तेन विचारित यत् तस्मिन् दिने अश्वस्य कृते यथेष्टं धनं नार्जितं । तेन अनुभूयते स्म यत् यः कोऽपि स्वीयम् उद्यमं सम्यक् जानाति यस्य च समीपे सदा पर्याप्तं भोजनं भवति, स एव स्वपिति । अन्यस्मै शकटवाहकाय तेन स्वसुतस्य मृत्युः ज्ञापितः । सोऽपि एकाकी आसीत् यतो हि तस्य आत्मजा ग्रामं गतासीत् । अन्ततः तेन अश्वस्य चिन्ता कृता । स स्वीयं प्रावारम् उपधार्य अश्वस्थलं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गतः । तत्र स खाद्यस्य ~~का~~ आश्य विषये विचारं करोति, किन्तु तथापि स अनुभवति यत् तस्यात्मजस्य मृत्युः तस्य कृते असहनीयः आसीत् । तेन अश्वस्य उच्यते - इदानीम् अहं दुर्बलः जातोऽस्मि । मम पुत्रः अस्मिन् कार्ये कुशल आसीत् । स तु श्रेष्ठः चालक आसीत्।चेत् स अद्य अजीविष्यत् तुभ्यं घासमदास्यत्.........।

=========

अष्टादशः पाठः

अन्तरिक्षे मानवः

अहो कीदृक् कमनीयः सर्वाह्लादकरः, आकाशे भासते चन्द्रः। यदा शीतलः चन्द्रः रात्रौ द्योतते तदा तस्य क्रोडे गन्तुम् अभिलाषः भवति । नभसि तारागणा अपि द्योतन्ते परं ते अन्धकारम् उन्मूलयितुं न समर्थाः । एकः चन्द्रः एव तमः दूरी कर्तुं समर्थः।अयमेव ग्रीष्मे तापतप्तान् जनान् स्वकीयैः शीतलैः किरणैः शीतलयति । राकायां चन्द्रः स्वकीयां पूर्णाभां प्राप्नोति । तस्य धवलया चन्द्रिकया सर्वस्मिन् संसारे धवलतायाः साम्राज्यं प्रसरति । शरच्चन्द्रः न केवलं सामान्यजनैः अपितु कविभिः अपि विशेषरूपेण प्रशस्यते ।

परं यः चन्द्रः अद्यावधि पूजितः लोकैः स न देवः, स तु पृथ्व्या उपग्रहो मन्यते वैज्ञानिकैः।मानवः तस्य उपरि गतः, चलितः अतः अयं न केवलं द्रष्टव्यः अपितु अधिगन्तव्यः ।

शतशः वर्षाणि व्यतीतानि यदा प्रभृति मानवः चन्द्रविषये तथ्यं ज्ञानं प्राप्तुं समाकुलः । अतः देशस्य विदेशस्य वैज्ञानिकैः चन्द्रम् अभिलक्ष्य विविधानि शोधकार्याणि समारब्धानि । अस्यां शताब्द्यां वैज्ञानिकैः कतिपयानि विस्रब्धानि तथ्यानि अधिगतानि किन्तु बहुकालं ते तत्र नागच्छन् यतो हि तत्र उपरि वायुहीनम् अन्तरिक्षं विद्यते । तस्य तले वायुयानम् उत्थापयितुं वायुः नास्ति । ततः अन्वेषितम् रसायनम् इदं रसायनं पुनः तैलवत् उर्जोउत्पादकम् ईंधनम् अस्ति । इदं निवाते क्षेत्रे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्राणवायुं विनैव ज्वलितुं शक्नोति । अस्य ज्वलनेन यद् शुषिलम्× उत्पद्यते मद्राकेट-यानस्य पृष्ठभागात् निः सरति । तस्य निःसरणेन राकेटं गतिंलब्ध्वा उपरि गच्छति । अनेन यानं वायुरहिते ऽप्य अन्तरिक्षे उत्पतितुं समर्थं भवति । अस्मात् प्राक् केवल वायुक्षेत्रे ।240 कि.मी. परिमिते। पृथिव्याः दूरं सम्भाक्यम् आसीत् । स्मरणीयं यद् वस्तुतः उनविंशति-शतोत्तर-सप्त-पंचाशे ईसवीये ।1957। ~~मासस्य चतुर्थे~~ रूसदेशेन प्रथमं स्पूटनिकम् उत्क्षिप्य अन्तरिक्षयुगस्य प्रारम्भः कृतः । इदं स्पूतनिकं ।~~8000~~। षट्चत्वारिंशत् प्रतिघंटं सहस्र कि.मी. गत्या पृथिवीं पर्यक्रमत् । ततः परं अमेरिका-देशः रूसस्य प्रतिद्वन्द्वी कथं शान्तः स्थातुं शक्तः आसीत् । अतः तेनापि अन्तरिक्षे अनेके उपग्रहाः प्रक्षिप्ताः । एभिः उपग्रहैः विविधानि अन्तरिक्षे सम्बन्धीनि तथ्यानि समधिगतानि ।स्वातन्त्र्यं समधिगम्य भारतम् अपि अन्तरिक्ष-क्षेत्रे बहु कार्यमकरोत् । भाभा-महोदयेन अस्य नेतृत्वं कृतम् । 1967 तमे वर्षे थुम्बा स्थित भारतीय-अनुसन्धान केन्द्रतः प्रथमं रॉकेटे रोहिणी-नाम उपग्रहः प्रक्षिप्तो भारतेन । ततः परं 1971 वर्षे अपरं उपग्रहो रोहिणी नाम्नैव प्रक्षिप्तः। अद्यावधि भारतेन अशीत्यधिकाः उपग्रहाः प्रक्षिप्ताः । 1975 तमे ~~वर्षे~~ वर्षे भारतीयैः एकः उपग्रहः आर्यभट्ट-नामा प्रक्षिप्तः ।अस्यभारः 360 ग्रामाणि आसीत् । 1979 ईसवीये जूनमासस्य सप्तम्यां तारिकायां अपरः उपग्रहः भास्करः प्रक्षिप्तः ।

1983 वर्षे हरिकोटातः द्वितीय-रोहिणी नामा अपरः उपग्रहः प्रक्षिप्तः । अन्ततः 1984 वर्षस्य अप्रैल मासस्य तृतीये दिवसे भारतेन मानवोऽन्तरिक्षे प्रेषितः)

उपग्रहे स्थापितानि यन्त्राणि अन्तरिक्षस्य विषये बहु महत्वपूर्णाः सूचना रोदो-यन्त्र माध्यमेन पृथ्व्यां प्रेषयन्ति । दूरसंचारे इमे बहु योगदानं कुर्वन्ति । पृथ्वी गोलाकारा । तस्मात् बहुदूरस्थस्थानात् रोदःसंकेता ग्रहीतुं न शक्यन्ते । उपग्रहमाध्यमेन इदं कार्यं सहजं भवति । उपग्रहमाध्यमेन गुप्तचर-कार्यमपि क्रियते । अपरस्य देशस्य उपरि गच्छति उपग्रहे तत्रस्थैः भाचित्रकैः यानि चित्राणि गृह्यन्ते तैः तद्देशस्य विषये महत्वपूर्णा सूचना प्राप्यते ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रेण (वेगेन) आ (परित:) खे (शून्ये) अटति इति राकेटं केवलं यानम् । तद् उपग्रहम् अन्तरिक्षे संस्थाप्य नश्यति । तत्र महान् व्ययो भवति । भारत: स्वान् उपग्रहान् अपर देशस्य राकेटै: अन्तरिक्षे प्रेषयति । स्वदेशे तेन राकेट-व्यवस्थापि कृता किन्तु तत्र दोषा जाता: । प्राय: तानि मध्ये मार्गे नष्टानि । भारते अधिकांशा जना दरिद्रा: । तदा राकेट प्रयोगे अति प्रभूतस्य धनराशे: नाशनं नोचितमिति केचिन्मन्यन्ते ।

1- आर्यभट: उपग्रहोऽस्य नाम्ना ख्यापित: तस्य किं महत्वम् ?

2- उपग्रहा: किं सर्वे: मनुष्यैरेव निर्मिता: ।

3- पृथ्व्या: प्राकृतिक उपग्रह: क: ?

4- दूरसंचारे कृत्रिमोपग्रहस्य किं योगदानम् ?

5- किं वायुयानं शून्ये उड्डयितुं शक्नोति ?

===========

अनविंश: पाठ:

जगदीश चन्द्र वसु:

भारते वंगराज्यस्य किमपि विशिष्टं महत्वं वर्तते । वंगराज्ये अनेके विश्वस्तरीया: जननायका: कवयश्च अभूवन् । यथा सुभाषचन्द्र वसु: रवीन्द्रनाथ ठक्कुर: विवेकानन्द: । तत्रैव एक: वैज्ञानिको जात: जगदीश चन्द्र: वसु: । भौतिक-बनस्पति विज्ञाने विश्रुत: जगदीशचन्द्र: स्वजन्मना वंगराज्यस्य मयमान-सिंह जनपदम् अलमकरोत् । अस्य जनम श्रीमत: भगवानचन्द्र वसो: गृहे उनविंशतिशतोत्तर-अष्ट पंचाशे ।1958। वर्षे नवम्बर-मासस्य त्रिंश तारिकायां ढाकानगरस्य समीपे रारेरथलग्रामे अभूत्। तदानीं तस्य जनक: राजकीय ~~सचकीय~~ सेवायाम् उपजिलाधीश: आसीत् । यद्यपि भगवान् चन्द्रो राजकीय प्रशासन सेवायां निरत: आसीत् तथापि तस्य रूचि: विविधेषु विषयेषु प्रसृता आसीत् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

औद्योगिकयां शिक्षायां तु स विशेषम् अवधानम् दत्तवान् ।

बालक: जगदीशचन्द्र: प्रारंभिकीं शिक्षां फरीदपुरे अवाप्य एकादशवर्षे कलिकातानगरम् अगात् । तत्र स जैवियर्स-विद्यालये प्रवेशं न लब्धवान् । अस्मात् विद्यालयात् स कलिकाताविश्व-विद्यालयीयां प्रवेश-परीक्षाम् उदतरत् । तेन विज्ञान विषये तत: स्नातकस्योपाधि: गृहीत: । अत: परं स उच्च शिक्षायै आंग्लदेशमगात् । तत्र प्रथमं तेन चिकित्साशास्त्रस्य अध्ययनं समारब्धम् किन्तु स्वास्थ्य दौर्बल्यात् स तत् कर्तुं नापारयत् । अत: कैम्ब्रिज क्राइष्ट चर्च विद्यालयात् विज्ञानविषयम् अवलम्ब्य स्नातकोपाधिं स अगृहणात् । अत्र तस्य भौतिक-विज्ञानस्य आचार्य: लार्डरेले, वनस्पति-विज्ञानस्य च सिडने विनेत् आसीत् ।

आंग्लदेशात् उच्च शिक्षां प्राप्य स स्वदेशं प्रत्यावर्तत । अत्र कलिकाता नगरस्य तदानीं प्रसिद्धे महाविद्यालये प्रेसीडेंसी भौतिकशास्त्रस्य प्राध्यापक: नियुक्त: । स: अत्रैव स्वीयं शोधकार्यं प्रारब्धवान् । तदानीं तस्य कार्यं भौतिक-शास्त्रे विद्युत्तरंगाणां क्षेत्रे आसीत् । तस्य शोध कार्यस्य परिणामा: तदानीन्तनासु विश्रुतासु पत्रिकासु प्रकाशिता: जाता: । एतत् अभिलक्ष्य स विज्ञानशास्त्रे पी-एच.डी. उपाधिना विभूषित: । विंश-शताब्दया: प्रारम्भे डा. जगदीश-चन्द्रेण शोधक्षेत्रं परिवर्तितम् । तस्य रूचि: प्राणिशास्त्रे जागरिता । तत्रासीत् एक: सिद्धान्त: यत् विद्युद्धाराया: प्रभाव: प्राणिषु वनस्पतिषु च परिलक्ष्यते, माप्यश्च वर्तते । अयं सिद्धान्त: वैलरमहोदयस्य आसीत् । अस्मिन्नेव क्षेत्रे वसु महोद्येन जगत्प्रसिद्धं शोधं कृत्वा सुनिश्चितं यत् वनस्पतिषु प्राणता वर्तते यतो हि तेन पशुषु शाक-पत्रेषु च विद्युद्धाराया प्रभाव: स्पष्ट: परिलक्षित: । अस्य शोध परिणामा: "रेस्पांसेस इनदी लिविंग एण्ड नौन लिविंग" शीर्षकेन प्रकाशिता: ।

अत: परं स वनस्पति विज्ञान क्षेत्रे विशिष्ट: ख्यातश्च विद्वान् संजात: । यस्मिन् वर्षे स सेवानिवृत्त: जात: तस्मिन्नेव वर्षे तेन एकस्य संस्थानस्य संस्थापना कृता । अस्मिन् संस्थाने तेन एकादश लक्ष-रूप्यकाणां निक्षेप: कृत: । अस्य धनस्य उपयोग: वनस्पति विज्ञाने शोधकार्याय कारित: । तदानीम् एकादशलक्ष-

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अघतनस्य कोटिरूप्यकम् आसीत् । स नाइट-उपाधिना अलंकृत: । लन्दनस्य रायल संस्थाया: सदस्य: अभूत् । वस्तुत: विज्ञान-क्षेत्रे स एक: सुदृढ: स्तम्भ: आसीत् । तस्य रूचि: दर्शनेऽपि आसीत् । स रवीन्द्रनाथ ठक्कुरस्य, महात्मनो गान्धिनश्च सम्पर्के आगत: ।

1- किं पादपा जीवा: ?

2- वसु महोदयेन तत् कथं साधितम् ।

=========

ऊनविंश: पाठ:

लोकान्तर-दर्शनम्

तत्रास्ति एका विपुला विश्रुता नदी चर्मण्वती । अस्या: जलम् अतीव निर्मलं स्वास्थ्यकरं सुस्वादु च वर्तते । न जाने कियन्तो जना: अनुदिनं तस्या: तटे विहरणाय गच्छन्ति । मम ग्राम: चकरनगरम् अस्या एव तटे स्थितम् अस्ति । अहमपि एकदा अस्या एव तीरे अगमम् । तस्या: तटे विहार: अतीव सुखद: जात: यदाहं श्रान्त: तदा तस्या एव तटे विश्रामाय समाविशम् । तत्रैवास्वपमुच्च । क्षणानन्तरं मया दृष्टं यत् कोऽपि यक्ष: मम समक्षम् आयात: । तस्य विशालं, भयानकं शरीराकारं विलोक्य अहं भयाक्रान्त: जात: । भीतेन मया न किंचिदपि उक्तम् । तेनाहं झटिति उत्थापित: । मांच विवशमादाय स दूरे कमपि अन्यं लोकमगात् ।

तत्र मया दृष्टं, सर्वेजना:, आबालवृद्धा: शान्त्या प्राचलन् । शनै: शनै: गभीरया गिरया मिथ: समालापन् । मम हर्षस्य पार: नासीत् यदा मया ज्ञातं यत् तत्र संस्कृतया भाषया व्यवहार आसीत् । अहं तेन यक्षेण तत्रैव विसृष्ट: पादाभ्याम् इतस्तत: भ्रमन् अहमेकं भव्यं प्रासादम् अपश्यम् । तत्रासीत् कश्चित् समारोह: । यदाहं तत्र उपागच्छं मया विलोकितं तत्र जना: एकस्मिन् भव्ये सभागारे उपविष्टा: आसन् । तस्मिन् सभागारे विविधवर्णा: दीपका: प्रज्ज्वलिता: आसन्,

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आस्तरणाय सुकोमल: कुथ: प्रयुक्त आसीत्, स्तम्भेषु रत्नजटिता न जाने कियत्य: पुत्तलिका:, शालभंजिका: तत्रासन् । तत्र रजतस्य आसन्द्य: आसन् । स्वर्णभूषिता: बल्लर्य: तत्र देदीप्यमाना: समलंकृताश्चासन् ।

यदाहम् अति निकटम् अगच्छम् मया दृष्टं यत् तत्र कस्यचित् नाटकस्य मंचनम् भवति स्म । तत: समुत्सुकोऽहम् अपश्यम् यत् तत् नाटकं संस्कृतायामासीत् । इदं नाटकं शाकुन्तलम् एवासीत् । मया विचारितं यत् वसुन्धरायां तु न कोऽपि जानाति अन्येषु लोकेषु किं भवति । अत्र तु जना: देवस्वरूपा: साधव: ते स्नेहेन व्यवहरन्ति ।

तत्र मया ससंकोचं पृष्ट: एक जन: - कथमेतत् यद् भवन्त: सर्वे स्नेहेन व्यवहरन्ति । मम् लोके तु नित्यं हिंसा प्रतारणा, संघर्ष: जायते । तेनोक्तम् अये स्नेहस्तु तदैव छिन्न: जायते यदा कोऽपि स्वार्थाय अन्यस्य हानिं करोति । स्वार्थ: तदा आयाति यदा कोऽपि अभाव: वर्तते, भौतिकवाद: प्रसरति, भाषावाद: भवति, वर्गवाद: भवति । अत्र नास्ति कोऽपि वाद: । समेषां कृते खाद्यान्नानि सुलभानि, समेषां कृते आवासा:, वस्त्राणि, यथेच्छितानि फलानि, सर्वाणि वस्तूनि सन्ति। अत: सर्वे सुखेन निवसन्ति । वयम् एकस्यां संस्कृतायां भाषायां संलपाम: तस्यामेव व्यवहराम: । मया तदैव दृष्टं यत् नाटके तत्र दुष्यन्त-भवनात् शकुन्तला कयापि अप्सरसा अपहृता । मया उक्तम्-इदं किम् इदं किं, कथमेतत्? यदा तेन न श्रुतं, मया तारस्वरेण चीत्कार: कृत: । तदैव मम अग्रजेन अहं पृष्ट:-भो सुधीर, किं जातम्, मया उक्तं स्वप्नआसीदयम् !!

========

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विशेषपाठः

काबुलीयः

— रवीन्द्रनाथठक्कुरः

तत्रासीत् एका पंच वर्षा मिनी नाम कन्या । सा बहु जल्पन-शीला आसीत् । तस्या बहुजल्पनं तस्याः मात्रे नारोचत किन्तु तस्याः जनकः तत्र अतुलम् आनन्दम् अन्वभवत् । स सदैव स्वजनकं विविधविषयान् अवलम्ब्य प्रश्नान् अपृच्छत् । सोऽपि नितरां स्नेहेन तेषाम् उत्तराणि अयच्छत् ।

कदाचित् तस्याः पिता स्वोपन्यासस्य सप्तदशाध्यायस्य लेखने निरत आसीत् । तदा सा कमपि काबुलीयं समागतं शिथिलवस्त्रोपेतम् उच्चोष्णीषोपेतं जनम् अद्राक्षीत् । तस्य कटिभागे काश्चन लघुपेटिकाः लम्बिताः आसन् । तेनापि सा अवलोकिता किन्तु भयभीता सा मातुः समीपं पलायिता ।

शनै शनैः स पुनरागतः गृहंप्रविष्टः परिचितः जातः, तस्याः जनकेन सा तत्रैव आकारिता। काबुलीयेन तस्यै द्राक्षा प्रदत्ताः। कतिचित् दिवसानन्तरं स पुनः आगतः, तस्याः द्वारे उपाविशत्, तया साकं बहुजल्पनं कृतवान् । तत् सर्वं तस्याः जनकेन विलोकितं यत् तस्याः भयं निर्गतम् । अतः इतः परं प्रायः तयोः सम्मिलनं भवति स्म । एकदा काबुलीयः रहमानः तां बालिकाम् अपृच्छत् त्वं कदा श्वशुरालयं गमिष्यसि ? मिनी - किं त्वं तत्रैव गच्छसि ?

इतपरम् एकदा तस्याः मात्रा तादृशीं मैत्रीं विधातुं सा अपवारिता किन्तु तस्याः जनकः अकथयत् - त्वं न जानासि स वृद्धः, स सरलः । न तु क्रूरः, स तां न अपहरिष्यति । ~~इति~~ । अतः मात्रा निषिद्धापि सा तेन सह अमिलत् । तयोः वार्ता प्राचलत्, यदा कदा तयोः सम्पर्कः प्रियतरः जातः । रहमानः तस्यै द्राक्षादीनि वानानि अयच्छत्, सा स्नेहेन अखादत् ।

रहमानः प्रायः वर्षे बारमेकं स्वदेशम् अगच्छत् । यदा तस्य प्रत्यागमनस्य समयः आगच्छत् तेन स्वीयं शेषं गृहीतव्यं धनराशिं प्राप्तुं गृहे गृहे गत्वा प्रयत्नः अक्रियत, तथापि तयोः सम्मिलनं प्रतिदिनम् अभवत् ।

एकस्मिन् दिने यदा तस्याः जनकः निजपुस्तकस्य मुद्रणं पश्यन्, तस्य संशोधने रत

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आसीत् स वीथ्यां कोलाहलम् अशृणोत् । तेन दृष्टं यत् द्वौ आरक्षकौ रहमानं बध्वा नयत: । रहमानस्य शरीरे रुधिरबिन्दव: आसन् । एक आरक्षक: तस्य छुरिकाम् आदाय प्रचलितस्म । तस्या: जनक: तस्य कारणम् अपृच्छत् । तेन ज्ञातं यद् रहमानेन कोऽपि जन: छुरिकया आहत:, क्रुद्ध: यतो हि रहमानात् तेन जनेनऊर्णावस्त्रं क्रीतं किन्तु तस्य मूल्यं न दत्तम् । तदैव मिनी अपि तत्र आगता । तया पृष्ट: स: ।

मिनी- किं त्वं स्वश्वशुरालयं गच्छसि ? रहमान: - (विलोक्य, विहस्य च) आम् बाले ! सत्यम् अहं तत्रैव गच्छामि ।

तत: परं एतद् सुनिश्चितं जातं यत् रहमान: अनेकानि वर्षाणि यावद् स्वीयाय अपराधाय दण्डित: जात: । तयो: सम्पर्क: छिन्न: । बहु समय: गत: । शनै: शनै: सर्वे तं व्यस्मरन् । समये याते मिनी एका युवती जाता। अन्या: अनेका: युवतय: तस्या: नूतना: सख्य: संजाता: । अत: परं पूजावकाशे तस्या: विवाहोऽपि सुनिश्चित: । विवाह समये तस्या: गृहं कोलाहलेन पूरितम्। तत्र गृहे व्यस्ततया:, व्यग्रताया: वातावरणं संजातम् । तदैव स काबुलीय: रहमान: तत्र समागत: । तस्य हस्ते तदा सा पेटिका नासीत् । तस्य दीर्घा: केशा: कर्तिता: तस्य अशुण्णा शक्ति: क्षीणा जाता । स भिन्या: पितरम् अभिवाद्य अकथयत्-

रहमान: - श्रीमन्, मिनी कुत्रास्ति ?

जनक: - इदानीं गृहे समुत्सव:, कार्याधिक्येन व्यस्तता जाता, त्वम् अन्यस्मिन् कस्मिन् दिने आगच्छ तर्हि -----

रहमान:-श्रीमन् किमहं क्षणं तां बालिका द्रष्टुं शक्नोमि ? ममापि, एका पुत्री, पश्य इदं तस्या: कर्गदोपरि चिह्नमस्ति ।।

।तस्य अवस्थितिं विलोक्य जनक: अश्रुपूर्णनेत्र: जात: यतोहि तेन अनुभूतं यत् तस्यापि तादृशी कन्या भवेत्। झटिति मिनी आकारिता। —सा

सा तदा विवाहाय समलंकृता आसीत् । सा रक्तवर्णां शाटिकां धृतवती, तस्या: मस्तके चन्दनस्य तिलक आसीत् । युवती मिनी भार्या-रूपे रहमानस्य सम्मुखम् उपस्थिता जाता । स तां तथालंकृतां विलोक्य आश्चर्य-चकित: अभूत् । ~~विहस्य~~

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ोक्तम्-बाले ! किं त्वं श्वशुरालयं गच्छसि ?

एतच्छ्रुत्वा सा लज्जया अवनतमुखी भूत्वा स्थिता अवर्तत । तस्या गमनानन्तरं रहमानेन ज्ञातं यत् तस्य पुत्री तादृशी एव समवयस्का भविष्यति । साऽपि विवाह-योग्या भवेत् इ मिन्या जनक: तस्मै शत-रूप्यकां मुद्रां प्रदाय उक्तवान् गृहाण एतत् । त्वं निज पुत्र्या: स्मरति गच्छ, तत्र गत्वा तां पश्य । मम पुत्री तव प्रसादेन सौभाग्यवती भविष्यति । अहं तु इदं विचिन्त्य हर्षान्वित: अस्मि यत् कोऽपि जनक: स्वीयाम् आत्मजां स्नेहेन, चिरकालानन्तरं मिलिष्यति ।

एकविंश: पाठ:

संस्कृतंजन भाषा स्यात्

संस्कृता भाषा सांस्कृतिकं, साहित्यिकं, दार्शनिकम्, ऐतिहासिकं च महत्वमावहति । सा राष्ट्रभाषापदमधिरोढुं समर्था अस्तीति सर्वे जानन्ति । अस्यामेकैव त्रुटि: दौर्बल्यं वा यत् सा जनभाषा नास्ति अथ च सर्वविध-व्यवहारे च सा न केनापि प्रयुज्यते । इदं दौर्बल्यं तस्या: कलंक एव कथयितुं शक्यते यं क्षालयितुं को नाम संस्कृतानुरागी न चिन्तयति न वा यथाशक्ति प्रयत्नं विदधाति ।

संस्कृतस्य प्रचाराय बहुधन-व्ययेनापि अनेके प्रयत्ना: क्रियन्ते तथापि अभीष्ट-सिद्धि: नैव दृष्टि पथं अवतरति । सम्पूर्णदेशे प्राय: द्वित्रा एव तादृशा: परिवारा: स्यु: ये मातृभाषावत् संस्कृतां प्रयुंजते । आश्चर्यं तु एतत् यत् ये संस्कृत-विषयम् अधीयाना: छात्रा: शिक्षका: पौरोहित्यं कुर्वाणा: पण्डिता: पुराणकथा-वाचकाश्च संस्कृता विद्वांस: तेऽपि संस्कृतां न वदन्ति, का कथेतरेषां सामान्य जनानाम् ।

अत्र इदं विचारणीयं यत् संस्कृतं कथं व्यवहारे न आयाति, कस्माच्च तस्या भाषणे काठिन्यमनुभवन्ति जना: । ये च संस्कृतां पठित्वा उपाधिधारिण: संजाता: तेऽपि भयेन लज्जया च कस्यापि समक्षं वक्तुं साहसं न कुर्वन्ति । ये च पुरोहिता: कथावाचकाश्च तेषां संस्कृता भाषणस्य आवश्यकतैव नास्ति इति मन्ये, यतस्ते आवश्यकतनुसारं पूजापाठोचितान् कतिपयान् श्लोकान् मन्त्रान् वा रटित्वा स्वां वृत्तिं चालयन्ति । संस्कृता-भाषणेन तेषां न किमपि प्रयोजनम् । तत् कथं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्कृता व्यवहारक्षमा भवेत् इति विचारणीयम् ।

वस्तुतस्तु सर्वेषामेतेषां संस्कृता जीविकायाः साधनमस्ति । संस्कृतस्या ऋणं समेषामुपरि वर्तते । अतः संस्कृतां प्रति अस्माकं किमपि कर्तव्यम् अस्ति इति विचारो मनसि तेषां नायाति इति महद् दुःखास्पदम् ।

अस्माकं विचारेणसर्वैव छात्रशिक्षक-पुरोहित-पुराणवाचकादिभिः, अन्यैश्च संस्कृतानुरागिभिः पारस्परिकं भेदभावं, मनोमालिन्यं, स्वार्थं, भयं, लज्जां च परित्यज्य एकीभूय संस्कृतां जनभाषां कर्तुं मनसा, वाचा, कर्मणा च प्रयत्नपरैः भवितव्यम् । कस्याश्चिद् भाषायाः भाषणे अभ्यास-दौर्बल्यं महत् व्यवधानम् उत्पादयति । अतः अनभ्यासपरि- जिहीर्षवो जनाः स्वगृहेष्वेव संस्कृतभाषाभ्यासं प्रारभन्ताम् । यतोहि गृहं सर्वेषाम् एव प्रारम्भिकीपाठशाला कथ्यते । शिशवोऽपि गृहेष्वेव भाषाज्ञानमुपलभन्ते । तत्र ये गृहस्वामिनः ते स्वबालकान् बालिकाश्च, अन्यांश्च परिवार-सदस्यान् अभ्यासं कारयन्तु, स्वयं चाभ्यस्यन्तु । प्रतिदिनमेषो-भ्यासः अनिवार्यः स्यात् ।

इतः परं संस्कृतासेवापरायणाः संस्थाः जनाः वा नगरेषु, ग्रामेषु च जनसम्पर्कं विधाय एतदर्थं सर्वान् प्रेरयन्तु । बालकान्, बालिकाश्च एकस्थाने समाहूय प्रतिदिनं प्रतिसप्ताहंवा अभ्यासं कारयन्तु । संस्कृतज्ञा महिला अपि अत्र योगदानं कुर्वन्तु । ता नारीसमाजं प्रेरयन्तु, शिक्षयन्तु च । अभ्यास-स्वाल्पताम् आदधानाः संस्कृतज्ञाः, ~~संस्कृतज्ञाः~~ प्रथमं शुद्धमशुद्धं वेति विचारमकृत्वा भयं संकोचं च विहाय गोष्ठीषु सम्मेलनेषु च सर्वेषां समक्षं संस्कृतामेव वदन्तु ।

एतदर्थं बालोपयोगीनि पुस्तकानि प्रकाश्यानि यत्र विविधाः वार्तालापाः आवश्यक-वस्तूनां संस्कृत-शब्दकोषा अपि संयोज्याः । पत्रपत्रिका श्चात्र साहाय्यं कुर्वन्तु ।

इत्थं सर्वे जनाः संस्कृतां जनभाषां विधातुं संघीभूय उत्तिष्ठन्तु कार्यं संलग्नतया, च सम्पादयन्तु । एवं कतिपयैरेव संवत्सरैः सा भाषा जनभाषापदं प्रति अग्रेसरा भवतु । अनेन अस्माकं राष्ट्रस्य गौरवं जनिष्यते ।

======

Kashi Maharani Collection, Ramnagar Fort, Varanasi